No. १३८८

Title अनुमान चिन्तामणि टीकायां अवयव ग्रन्थ रहस्यं

Author ×

Extent २३ Age ×

Subject न्याय शास्त्रं

अनुमानचिन्तामणिटीकायां ववपदगंधरस्य

१३८

१००

मथु०
१

॥श्रीगणेशायनमः॥ ॥केवलान्वयिहेतुकानुमाननिरूपणानंतरंव्याप्त्यादिनिरूपणे संगतत्वशंकानिरासार्थं संगतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते ननु केवल्यादिनन्पूर्वनिरूपि
तं मनुमानं केवलान्वयिहेतुकानुमाने परार्थपरविचारविषयार्थसाधकं न्यायसाध्यं न्यायप्रयोज्यं॥ इतीसनंतरं प्रयोजकत्वसंगत्येति पूर्वग्रंथयोजनया पूर्वनिरूपितपदार्थानुमानं न्यायादि
साध्यमिति प्रयोजकत्वं संगत्याभावाद्योनिरूपणं नत्विति निरूपणं नत्वेनस्वार्थः नत्वन्यायजन्यत्वव्याप्त्यादिबुद्ध्येसमस्तरूपोपपन्नेत्यादि समस्तरूपोपपन्नं असत्प्रतिपक्षितत्वाबाधितत्वपक्षसत्वसप
क्षसत्वविपक्षव्यावृत्तित्वात्मकं पंचविशेषणविशिष्टं न यावत्तथाविधपंचविशेषणविशिष्टलिंगज्ञानजनकं वाक्यं न्यायइत्यर्थः ४ नत्रैववाक्यइतिनिरूपंचविशेषणविशिष्टहेतुरितितार्किकरस्यर्थः॥
किंविसादि अनुमितिचरमकारणलिंगपरामर्शः। असत्प्रतिपक्षितत्वादिरूपपंचविशेषणविशिष्टहेतुज्ञानं तत्प्रयोजकीभूतं शाब्दज्ञानं तज्जनकवाक्यत्वं न्यायत्वमित्यर्थः अत्र प्रतिज्ञादिवाक्यपंचक
जन्यबोधमात्रस्य प्रतिज्ञादिपंचवाक्यरूपन्यायैकत्वज्ञानं संगमयति प्रतिज्ञाभिति एकवाक्यतयाविशिष्टविषयकैकान्वयबोधजनकत्वार्थकमयोर्वाक्याविशिष्टज्ञानं प्रतिज्ञादिवाक्यपंचकस्य एकविशि
ष्टार्थत्वाद्विषयकं ज्ञानं तेनेति ज्ञाद्दशविशिष्टार्थविषयकज्ञानेनेत्यर्थः। विशिष्टवैशिष्ट्यावगाहिमानान्तरमिति पक्षवत्त्वादिविशेषणाद्यानात्मकस्वस्वरूपकारणान्तरमित्यर्थः उक्त्याप्यते संघाद्य एम०
१

नैतेनचेति। तथाविधकारणेन चेत्सर्वस्यैव परामर्शः स्यादिति असत्प्रतिपक्षितत्वादिविशेषणविशिष्टलिंगज्ञानमित्यर्थः तथा चानया प्रणाल्या तथाविधपरामर्शप्रयोजकयावज्ज्ञानजनकत्व
सत्त्वाल्लक्ष्ये लक्षणसमन्वय इति भावः ननु प्रतिज्ञाहेत्वोरयं पदानानुषंगकत्वेऽपि यत्र पत्निगमनयोश्च परस्परापेक्षितविशिष्टैकार्थविषयकयावद्बोधजनकत्वसंभवेऽपि प्रतिज्ञाहेत्ववयवादे
र्नीतरावयवार्थेन सहान्वयबोधजनकत्वं तात्पर्याभावात्। अम्याप्रतिज्ञानिगमनादे रपि एकवाक्यतया एकान्वयबुद्धिजनकत्वापत्तेः तात्पर्यकल्पनाया अविशिष्टत्वात् तथा च प्रतिज्ञादिवाक्यं
पृथक्जन्य एकान्वयबोध एवासिद्धः कथं तन्मात्रा यल्लक्षणसमन्वय इति चेदत्र मणिकारमतानुयायिनः प्रतिज्ञाहेत्वोरुदाहरणेन सहान्वयबोधजनकत्वे किं बाधकं न च तात्पर्याभावः तस्या
पेक्षापरिच्छेद्यत्वेन तथात्वकल्पने बाधकाभावात् अथवा यथा सति निगमनेन सह हेतुवाक्यतया प्रतिज्ञाहेत्वोरन्वयबोधजनकत्वप्रसंगः तात्पर्यकल्पनाया अविशिष्टत्वादिति वाच्यं तयोरेकान्वयबोधजनने
तात्पर्याभावेऽपि तात्पर्यग्रहात् तथापि वाक्यबोधापत्तेः भवतामपि दुरपह्नवत्वात् यदि चेत्तत्र तात्पर्यमानमुपगमेन तथापि निर्वाहयितुं शक्यत्वात् तथापि निगमनादौ प्रतिज्ञाव्यवहितोत्तरहेतु
रूपानुपूर्वीमानमुपगमेन तथापि निर्वाहयितुं शक्यत्वात् तथा च प्रतिज्ञाव्यवहितोत्तरहेतुवचनाव्यवहितोत्तरोदाहरणाव्यवहितोत्तरोपनयाव्यवहितोत्तरत्वरूपानुपूर्वीविषयकनिगम

मथु० २

नविशेष्यकज्ञानजन्यताविषयविशिष्टार्थविषयकान्वयबोधजनासमर्थत्वात् सहकृतजन्यताविशिष्टार्थविषयकैकान्वयबोधोत्पत्तौ बाधकाभावेनोपोत्कातुपपत्तेरभावात् अथ यदुदाहरणघ
टकीभूतप्रथमपदसंदेहेन महानसं उपस्थाप्यतेन तथाविधद्वितीयपदसंदेहेन महानसभिन्नमुपस्थाप्यते तथा चोदाहरणवाक्यात् धूमवन्महानसं वह्निमत् धूमवन्महानसभिन्नं वह्निमदिति सन्वयबो
धः एवं चोदाहरणवाक्यानामेव परस्परविशिष्टान्वयबोधो दुर्जयः सुतरामितरावयवार्थेन सह न ह्ययं नियतो नियमो येनोदाहरणघटकीभूतपदस्य हेतुपदस्य यांतवाक्यस्य च वह्निपदनिरूढधूमव्याप
कवह्निबोधनासमर्थकत्वग्राहकत्वेन मद्दुर्थानो उदाहरणार्थघटकतया उदाहरणवाक्यार्थधूमव्यापकवह्निसंबंधिधूमवत्त्वं इतरावयवार्थेन सहान्वयेबाधकाभावेनानुपपत्त्यभावात् न च न्यायि
प्रत्येकावयवजन्यावान्तरशाब्दबोधस्यापि तथाविधविशेषणतात्म्यात्मक महावाक्यार्थविषयकबोधजनकत्वेनानुमितिचरमकारणप्रयोजकतया तन्मात्रापत्तेरेकवाक्यतामिति वाच्यं धूमवत्ता
न्नताप्यवह्निसंबंधिपर्वताभिन्नधूमव्यापकवह्निसंबंधिधूमवद्भिन्नवह्निव्याप्यधूमवद्भिन्नपर्वतविशेष्यकवह्निव्याप्यधूमवत्तान्नताप्यवह्निसंबंधभेदविषयकशाब्दबुद्धित्वावच्छिन्नकार्यता निरूपि
तकारणतावच्छेदकीभूतानुपूर्वीघटकप्रतिज्ञादिवाक्यपंचकत्वे पंचत्वसंख्यापर्याप्त्याश्रयस्य तथाविधजनकवाक्यान्तेन विवक्षितत्वादत्र तथाविधानुपूर्वीघटकत्वं विशेषणोपादानान्मुक्तमा राम० २

द्यरितत्वनिरूपितत्वादिवाकार्यं चेत्ऽतिव्याप्तिः। साध्यसाधनभेदेन विभिन्नव्याप्यलक्षणानां लक्षणानामपि विभिन्नत्वे नान्योन्याव्याप्तिः। एवं कारणकारणशक्तिः परमरहस्यं न्यायावयवलक्षणमाह अनुमिती
हादि अत्र शाब्दज्ञानजनकताकालीनमात्रमुदासीनवाक्ये। तिव्याप्तमननस्य याविधप्रयोजकशाब्दज्ञानजनकतां न्यायांनगेनापर्थिकं। मयाचन्यायांनगलिखिसति शाब्दज्ञानजनकताकालं न्यायावयव
त्वमिति न्यायावयवलक्षणवाक्यार्थः नैवं सतौ प्रतिज्ञाद्येकदेशे वह्निमद्वाक्यादावतिव्याप्तिरिति वाच्यं प्रतिज्ञादिजन्यमनन सदर्थविषयकसमूहालंबनात्मकशाब्दज्ञाननिष्ठप्रतिज्ञादिजन्यतावच्छेद
कधर्मविच्छिन्नपंचजन्यमात्मन मनस्यतानिरूपितकारणतावच्छेदकताय यदपि विकरणानुपूर्वीकत्वस्य शाब्दबोधजनकत्वेन विवक्षणात् वह्निमत्पदादिनिष्ठानुपूर्व्यास्तु न याविधप यत्किंचिदधिक
रणाभावान्न तत्रातिव्याप्तिरिति। न च सदी शिवः पृथ्वीदेवत्वादिस्यादिमति ज्ञाघटकीभूत शिवः पृथ्वादिविभागेऽतिव्याप्तिः। तस्यापि महत्त्वप्रतिज्ञाजन्यतावच्छेदकधर्मविच्छिन्ननिरूपितजनकताव
च्छेदकाऽनुपूर्वीकत्वादिति वाच्यं। स्वघटितवाक्यप्रतियन्नत्वार्थकत्वे सति तथाविधानुपूर्वीकत्वं मत्वमिति लक्षणाकरणात्॥ परामर्शजनकं वाक्यं न्यायः। न याविधवाक्यघटकीभूतं वाक्यं न्या
यावयव इति प्राचीनमतं न्यायजन्यावयवलक्षणोपेक्षा बीजमाह अतएवेति। प्राचीनमतं न्यायपन्न यावयवलक्षणोपेक्षात एव सर्वः। वह्निव्याप्यधूमवानयमिति वाक्यं इति तथाविधधूमवान

3

म·पु०
३

यंपर्वतः इत्याकारकबोधजनकेन तथाव्याप्यमिति वाक्येनेत्यर्थः। नन्वेवं यद्वह्निव्याप्यघटकीभूततत्पदेनेत्यर्थः व्यापकत्वं यच्चलक्षणतोऽनियमात् संख्येनान्वयः। नन्वत्रातिव्याप्तिरसंगतैव ना
मार्थयोर्भेदान्वयस्याव्युत्पन्नतया तथाविधवाक्येन वह्निव्याप्तिविशिष्टधूमसंबंधोपमितः पर्वत इति बोधजननेन व्याप्तिविशिष्टहेतुविशिष्टपक्षावगाहिपरामर्शजननादित्यत आह तेनेति।
।तादृशवाक्येनेत्यर्थः। तच्छब्देन चेति। तादृशवाक्यघटकीभूततत्पदेन चेत्यर्थः। परामर्शजनकस्येति विशेषणज्ञानादिविधया परामर्शजनकस्येत्यर्थः। जननादित्यनेनैनाबाधकाभावादित्य
र्थः। अयं भावः मृत्त्वेन घटः चेद्द्रव्यमुखमित्यादौ नञर्थस्याभावे प्रतियोगितासंबंधेन घटस्य द्रव्यपदार्थस्य साहचर्यकदेशोऽयं इत्यादावन्वयानुभवात् नञ्चयप्रतिपन्नातिरिक्तनामार्थयोरेव भेदान्वय
स्याव्युत्पन्नतया प्रकृते तत्पदार्थस्यैव व्यापकतत्पदार्थस्य व्याप्तिविशिष्टधूमस्य पर्वते तद्विशिष्टेसंयोगादिसंबंधेनाभानेऽबाधकाभावदिति तथाविधतात्पर्यकवनिलधर्मितावच्छेदककवह्निविधेयकानु
मितिजनकत्वात्परामर्शस्य व्याघात इति ध्येयं। व्यापकत्वपदस्यापि साध्यमंगीकुर्वतां मते आह यद्वेति। संक्षेपेन इति लाघवादित्यर्थः। परामर्शप्रयोजकत्वात्तत्वस्य व्याप्यपदार्थतावच्छे
दकत्वं अभेदोयः। नन्वेवं सति पूर्वोक्तोपमर्षः तित्याप्तिरित्यत आह यत्परामर्शेत्यादि। विशेषाभावादिति यत्तित्वादिवाक्यपंचकायेव्याविशेषाभावादित्यर्थः॥ सोपीति। तथाच यत्परामर्शोपी राम०
३

त्यर्थः । न चाव तत्रापि लिङ्गस्य त्वान्नतत्रान्तिप्राप्तिरिति भावः ॥ कथायामिति जल्पवितण्डादेरित्यर्थः ॥ आकांक्षाक्रमेणेति जिज्ञासाक्रमेणेत्यर्थः । अभिधानमिति न्यायप्रयोग इत्यर्थः । विशिष्यैव । विशेष्यस्य
द्विविधिस्याप्तिविशिष्य धूमादेर्वैशिष्ट्यबोधे जिज्ञासानालीत्यर्थः । तदभिधानमिति ॥ प्रथममिति स्यानुयोगः । न चाव प्रथमं न चाचायमिति वाक्यप्रयोगे कृतं इत्यर्थः । निग्रहादिति । अर्थान्तरात्मकनिग्रहस्थानप्र
संगादित्यर्थः । न चाव मायस्य प्रथमतो वादिवाक्ये नियमाभावात्तत्कान्तस्य प्रथमतोऽभिराकाङ्क्षा । किं तस्यापि तथाचायमिति वाक्यस्य प्रथमतोऽभिधानमावश्यकमिति । अर्थान्तरप्रसंग इति भावः ॥ ननु निय
मानाभावान्नस्य लिङ्गजिज्ञासितमभिधानमर्थान्तरं प्रकृतस्य लिङ्गानुरोधानियमस्य सत्त्वात्प्रथमं तदभिधाने अर्थान्तरप्रसंग इत्यत आह । अन्यथेति नियमसत्त्वे । जिज्ञासितनाभिधानस्य अर्थान्तरत्वाभावे इत्यर्थः ।
यत्तु रादेरपि स्यादित्यादि मायत्व हेतो वा कारणत्वनिवेशे गौरवात्प्रथमं व्याप्तिजन्यत्वमेव न्यायत्वमित्युपेयं च हेत्वादेरपि मायत्वं किं नाम्नुपेयत इति भावः ॥ आकांक्षाविरहस्त्वप्रवृत्तेनियमसत्त्वेऽपि तत्रैव अत्रा
पि जिज्ञासाविरहः । प्रथमाभिधानमर्थान्तरत्वासंपादकं इत्यर्थः । व्याप्तिवन्नियमासत्त्वे इत्यपि निवेशसामान्यतो । जिज्ञासिताभिधानमर्थान्तरत्वाभावान्न चाव हेत्वादिमाधारणान्यायत्वहेतोरुक्तनियम
वत्वान्तरं काङ्क्षितस्य वह्न्यभिधाने अर्थान्तरप्रसंग इति । ननु तत्राधारत्वान्यापत्त्यहेतोरपि विभाव्यते न तदा वाक्यावघटितो यदि प्रतिज्ञापत्त्यहेतोरपि पूर्वोक्तार्थान्तरदोषो दुरुद्धर इति भावः । ये तु प्रति सा

4

म॰मु॰ ४

द्विपंचावयवजन्यशाब्दबोधे एकां जातिमुपेत्य न यावद्विधविजातीयशाब्दज्ञानजनकताकत्वं यावल्लमिति न्यायलभ्यत्वां ॥ एवं प्रतिज्ञादि प्रत्येकावयवजन्यप्रत्येकशाब्दबोधेषु नैकैकलभ्यत्वमेकां जातिमुपे
त्य तथाविधविजातीयशाब्दज्ञानजनकत्वं न्यायावयवत्वमिति न्यायावयवलभ्यत्वं वदन्ति न न्यूनमुपन्यस्यतीत्यन्ये इत्यपि । विजातीयमिति । प्रतिज्ञादिपंचावयवजन्यमहावाक्यार्थबोधवृत्तिजात्याश्र
यमित्यर्थः । तद्धीजनकत्वं । तादृशविजातीयशाब्दज्ञानजनकत्वं । न्यूनलभ्यत्वमिति । न्यायावयवलभ्यत्वमित्यर्थः । ज्ञानविशेषेति ॥ विजातीयशाब्दज्ञानेत्यर्थः ॥ न ज्ञानेनेति विजातीयशाब्दज्ञानेनेत्यर्थः । दुर्निरू
प्यमिति दुरुपपन्नमित्यर्थः । तथा च जनकतावच्छेदकघटितस्य तन्न्यायत्वस्य सिद्धत्वनियतपूर्ववर्तितावच्छेदकधर्मविरहस्य तत्र ज्ञानकत्वस्य न तज्ज्ञानाधीनत्वात् तथाविधजनकत्वज्ञानस्य च तज्जनकतावच्छेदकरूपस्यासंभवे
नासंभव इति भावः । इतीति । अतो हेतोरित्यर्थः ॥ तत्स्वीकारे तस्यैवेति । एवकारो भिन्नक्रमे एवमन्यः । तथा च तादृशधर्मस्वीकार एव विजातीयशाब्दज्ञानजनकत्वस्य लभ्यत्वासंभवादित्यर्थः । न च तेनानुमादृशध
र्मभावादुपदर्शितस्य लभ्यत्वासंभव इति भावः । न चानुपूर्वी विशेषरूपत्वेन तादृशधर्मोऽस्तीति वाच्यं आनुपूर्वीविशेषस्य पदवैनोपेक्षिमानपदेनोऽप्रिमात्रिनिमानाविषयप्रतिज्ञादिसाधारणस्यानुगतस्यासंभ
वेन तथात्वासंभवादिति ॥ ननु जनकत्वे मजनकतावच्छेदकघटितं अपि तु अतिरिक्तं तथा च तज्जनकतावच्छेदकं विनापि न जनकत्वे तादृशजनकत्वज्ञाने बाधकाभावान्नोपदर्शितस्य लभ्यत्वासंभव इत्य

राम॰ ४

तत्राह अप्रयेति ।। तद्धनुगतजनकतावच्छेदकं विनापि तत्तद्विषयजातिस्वीकारे इत्यर्थः । जातिसंकरप्रसंग इति । तुल्ययुक्त्या एकघटैकपटोभयसाधारणस्यापि जातिविशेषस्य स्वीकारापत्तेः तत्राह्य
घटत्वपटत्वादिजातीनां सांकर्यप्रसंग इत्यर्थः । तथा च एतादृशबाधकेन तद्धनुगतजनकतावच्छेदकं विनानतिप्रसक्तजातिर्नाङ्गीक्रियते इत्येव स्वरूपं वाच्यं ।। एवं च प्रकृतेपि जातिविशेषप्रमाणाभावेन तद्धवि
तत्त्वस्तरामनुपपन्नमेवेति भावः । तत्रेति । तेषु मायावयवेषु मध्ये इत्यर्थः । साध्यनिर्देशः साध्यबोधकं वाक्यं । साध्यपदेति । वह्निपदादावित्यर्थः । तेनापि वह्न्यादिरूपसाध्यबोधजननादिति भावः । किंत्विति साधि
ता । अत्र तथाविधजनकत्वसत्त्वे सतीत्यर्थः । न्यायावयववृत्तिसतीत्यर्थकं । उद्देश्यतावच्छेदकधर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकत्वं । तथाविधानुमित्यनुकूलविषयकत्वं । पक्षतावच्छेदकवि । शिष्टसाध्यतावच्छेदक
विशिष्टवैशिष्ट्यावगाहित्वं तथाविधानुमितित्वं । तन्निरूपितविषयत्वं ।। तथाविधानुमितिविषयताव्याप्तजनकैतत्त्वरूपा च या विषयता तद्वत्त्वं । एवं च प्रकृते न्यायावयवत्वे सति पक्षतावच्छेदकविशिष्टपक्षे सा
ध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहितद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकानुमितिविषयताव्याप्तजनकत्वरूपा या विषयता तद्वद्बोधजनकवाक्यत्वं तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्न
साध्यकप्रतिज्ञात्वमिति तत्त्वं स्पष्टतावान्तरार्थः । अतोऽग्रे पर्वतो वह्निमानिति वाक्ये । तिव्याभिचारणाय प्रकृते न्यायावयववृत्तिसतीति प्रकृते तत्त्वमत्र तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकत्वं अभिधेयं इत्य

5

मयु०
५

ज्ञानजन्यज्ञानीयं द्रव्यादित्यादौ हेत्ववयवे विषयताख्यावच्छिन्नपक्षकद्रव्यज्ञानजन्यज्ञानीयपक्षसाध्यकप्रतिज्ञात्वस्वरूपातिव्याप्तिवारणाय यथावयवेन तद्धर्मावच्छिन्नपक्षकत्वनिवेशः। एवं पर्वतो द्रव्यवानि-
त्यादौ द्रव्यप्रकाराप्यधूमवान् पक्षिसुपनये द्रव्यात्माप्यधूमत्वावच्छिन्नसाध्यकपर्वतत्वावच्छिन्नपक्षकप्रतिज्ञात्वस्वरूपातिव्याप्तिवारणाय यथावयवेन तद्धर्मावच्छिन्नसाध्यकत्वनिवेशः। अत्र धूमालोकवान्
पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवे ऽतिव्याप्तिवारणाय पक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वनिवेशः। न चैवं यथाविधहेत्ववयवजन्यबोधेन यथाविधानुमितिविषयताख्यावृत्ते यत्नधूमज्ञानज्ञाप-
त्वमुख्यविशेष्यतासंबन्धेनाश्रयीभूतमुख्यविशेष्यताख्यविषयताशालित्वसंबन्धेन ज्ञानप्रकारविशेषणाविरहात् कथं न व्याप्तिविधवोधजनकहेत्ववयवे ऽतिव्याप्तिरिति वाच्यं। प्रकृते मुख्यविशेष्यतास्वा-
नियमितस्यैव लक्षणघटकस्य निवेशात्। न चैवं तत्रातिव्याप्तिवारणार्थं पक्षसाध्यवैशिष्ट्यावगाहित्वनिवेशो ऽस्तु किंपक्षतावच्छेदकवैशिष्ट्यनिवेशनेनेति वाच्यं। तथा सति द्रव्यान् यमेयत्ववद् अभिधेयं द्रव्यज्ञान-
जन्यज्ञानीयं द्रव्यादित्यादौ हेत्ववयवे ऽतिव्याप्तेः। तज्जन्यबोधस्य विषयताख्यप्राभिधेयपक्षसाध्यवैशिष्ट्यावगाहित्वात्। न चैवं तथापि साध्ये साध्यतावच्छेदकवैशिष्ट्यनिवेशप्रयोजनाभाव इति वाच्यं विषयत्वं-
प्रमेयाद् अभिधेयत्ववत्वाच्यत्वप्रमेयादित्यादौ हेत्ववयवे ऽतिव्याप्तेः। तज्जन्यबोधे विषयताख्यपक्षतावच्छेदकविशिष्टप्रमेयत्वज्ञानजन्यज्ञानाकोवाच्यत्वरूपसाध्यवैशिष्ट्यावगाहित्वस्य सत्त्वात् तदुपनयपक्षे पं राम०
५

परानुषंगकल्पे पर्वतत्वस्य विशेषणत्वे विशिष्टवैशिष्ट्यावगाहिबोधजनकेन तस्माद्वह्निमानिति निगमनेन पर्वतपक्षकवह्निसाध्यकप्रमितालक्षणातिव्याप्तिवारणाय तथाविधविषयताश्रयत्वस्य निवेशः न चात्रा
नुमितौ न इदमवच्छिन्नपक्षकत्वनिवेशप्रयोजनाभाव इति वाच्यं। अपरपरानुषंगकल्पे तस्माद्वह्निमानिति निगमनेन पर्वतत्वावच्छिन्नपक्षकवह्निसाध्यकप्रमितालक्षणातिव्याप्तिः तज्ज्ञाप्यबोधेव
न्हित्वावच्छिन्नसाध्यकायाः वह्निव्याप्यधूमवानयं तस्माद्वह्निमत्सधर्मा पर्वतो वह्निमानिति समनुमितिस्तद्विषयताया अवच्छेदकत्वलक्षणाश्रयविषयताश्रयत्वस्य सत्वात् तत्र तदिदमवच्छिन्नसाध्यकत्ववि
शेषणस्यापि वाच्यं। अयं परानुषंगकल्पे तस्माद्वह्निमानिति निगमनेन पर्वतत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकप्रमितालक्षणातिव्याप्तेः। तज्ज्ञाप्यबोधे पर्वतत्वावच्छिन्नपक्षकत्ववह्निव्याप्य
धूमवान् तस्माद्विशिष्टवह्निसाध्यकानुमितिविषयताया अवच्छेदकत्वलक्षणाश्रयविषयताश्रयत्वस्य सत्वात् तत्र तदिदमवच्छिन्नपक्षकत्वं तदिदमपि पर्याप्तावच्छेदकतानिरूपितत्वविशेषणतात्पर्यकं एवं त
दिदमवच्छिन्नसाध्यकत्वमपि तदिदमपर्याप्तावच्छेदकतानिरूपितत्वस्य विशेषप्रकारेणानाप्तालिङ्गत्वबोध्यं॥ नातः उपदर्शितस्थले निव्याप्तिरिति ध्येयं॥ अयं पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यात् पर्वतो वह्नि
मदभिन्न इत्यादिशाब्दबोधस्य बोधस्य घने न तु पर्वतनिविशेष्यकसंयोगसंबंधेन वह्निप्रकारकबोधः नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधानंगीकारात्। तथा च प्रतिज्ञावाक्येय पक्षेसाध्यवैशिष्ट्यावगा

6

मु॰
१६

ङ्खोधाजनकत्वात्स्वरूपासंभवप्रसङ्ग इति निरस्तं नामार्थयोरभेदातिरिक्तविभक्त्यर्थातिरिक्तसंबंधेनैवान्वयबोधस्याव्युत्पन्नतया विभक्त्यर्थसंसर्गत्वेन संबंधेन तयोरन्वयबोधोपयोगिकारे स्वतिविरह
न् अतएव नामार्थयोरन्वयबोधे विभक्त्यर्थोपस्थितिस्तत्र मिलितपिसंगछेन अप्रयोजकत्वात् शाब्दबोधस्यापि सिद्धान्तलक्ष्यमानानुपपत्तेरिति निसारं। परिच नामार्थयोरभेदातिरिक्तसंबंधेनैवान्वयबोधः स्वसत्र
इति मतेनदृष्टान्तलक्षणास्यासंभवप्रसङ्गलनयात्स्वरूपं तरमाह अन्यूनानतिरिक्तपदमित्यादि। अनुमितेरनूनानतिरिक्तविषयकपदमित्यर्थः। लिङ्गविषयकत्वमिति। लिङ्गपदं लिङ्गत्वपरं तच्च साध्य
तावच्छेदकावच्छिन्नसाध्यतामकतौपयिकी हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठा व्याप्तिस्तद्रूपत्वं तथा च तादृशव्याप्तिविषयतामात्रस्य शाब्दबोधजनकत्वेऽसति मायायावयवत्वं प्रतिज्ञाया इति मिलितस्वरूपवाक्या
र्थः।। अतो उदाहरणादावतिव्याप्तिवारणाय अन्यूनांतं शाब्दबोधविशेषरूपानचान्वयव्यतिरेकव्याप्त्युभयसाधारणतादृशव्याप्तिविषयैकस्याभावात् एकोपादाने चापरविषयकबोधजनकेऽदाहरणादा
वतिव्याप्तेरनंतत्वसंभवदुक्तिकमिति वाच्यं हेतुतावच्छेदकावच्छिन्नहेतुनिष्ठसाध्यतावच्छेदकावच्छिन्ननिरूपितान्वयव्याप्तिहेतुतावच्छेदकावच्छिन्नहेतुनिष्ठसाध्यतावच्छेदकावच्छिन्नाभावव्यापकीभूताभावप्र
तियोगित्वरूपव्यतिरेकव्याप्त्योरन्यतरस्य तथाविधव्याप्त्यर्थत्वात्। अत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमान् धूमव्याप्यधूमवान् पर्वतो वह्निमानित्यादि प्रतिज्ञासंग्रहाय हेतुतावच्छेदकावच्छिन्नसाध्यतावच्छे

राम॰
१६

रुकाबाच्छिन्नयोर्निविरोधः। न चास्मिन्नल्पसरोधूमादित्यादिहेत्ववयवेतिव्याप्तिः तज्जन्यबोधस्य व्याप्यविषयकत्वादिति वाच्यं हेत्ववयवाम्मते सतीति विशेषणोपादानात् अनुमित्यन्यूनानतिरिक्तविष
यकत्वघटितत्वल्पसतोऽनतिरिक्तविषयकत्वस्याव्याप्तिमाह निगमनं चेत्यादिना परामर्शहेतुः नानुमित्यनतिरिक्तविषयकशाब्दबोधजनकं सतत्र्यायावयवः एतद्देवोपपादयति अबाधितेत्यादिना।
नयावृनिगमनजन्यबोधेऽनुमितिसविषयाबाधितत्वादिविषयकत्वेनानुमितिविषयताव्यापकत्वं यद्वैलक्षण्यं तत्तदाश्रयीभूतविषयताश्रयत्वस्याननतिरिक्तविषयकत्वस्याऽभावान्निगमनेनातिव्याप्तिः।
तद्दृष्टान्तेनुमापावयवत्वादिविशेषणाघटितत्वल्पसरास्यनत्रसत्वात् तत्रातिव्याप्तिमर्थवत्येवेतितद्वारणाय तदुपादानमिति भावः। ननु निगमनस्य कथमबाधितत्वादिविधियकबोधजनकत्वं तत्र न हि
धकपरामर्शादित्यवेच्छानिगमनघटकीभूतनसहस्याबाधितस्यादिविशेषणाविशिष्टहेतौ व्याप्तिकत्वात् सर्वनाप्तिनल्पसरोसस्यप्रवाह मात्रत्वात्॥ अथवानिगमनवाक्येन व्याप्तिविशिष्टहेतु
तानतापक्षेनवह्नौ बोधिते एकवाक्यतया पनिताहेत्ववयवाभ्यां बोधितस्य वह्नौ धूमताप्यत्वस्य पुनर्बोधिते किं प्रयोजनमिति प्रयोजनाकांक्षायां अबाधितत्वादिबोधस्यैव नयाख्यकल्पनेन निग
मनस्याबाधितत्वादिविषयकबोधनौपयिकविशिष्टहेतुसंबंधबोधजनकत्वेनाबाधितत्वादित्यादिग्रं यस्याबाधितत्वादिविषयकबोधौपयिकविशिष्टहेतुसंबंधबोधजनकत्वादित्यर्थकत्वात्॥वाक्यं

7

म·पु०

त्तरवोधितहेतुसंबंधस्यकथंअवाधितत्वादिविषयकवोधोपयिकत्वमितिनाशंकनीयं। हेतुत्वाधिनत्वादिमान्साध्यनिषुहेतुत्वानज्ञाप्यत्ववोधकवाक्यानंतरोत्पन्नवाक्यवोधितसाध्यनिष्ठहेतु
ज्ञानज्ञाप्यत्वघटकहेतुत्वादिरनुमानादवाधितत्वादिविषयकवोधसंभवेनहेतुतावच्छेदकविधेयकहेतुज्ञानज्ञाप्यत्वस्यवाधितत्वादिविषयकवोधजनकत्वसंभवादिति॥ प्रतिज्ञानलक्षणांतरमा
हहेत्वभिधानेति। हेत्वभिधानप्रयोजिका यावह्निज्ञानजनकज्ञानेच्छाविषयजिज्ञासा तज्जनकवाक्यत्वं प्रतिज्ञात्वमिति प्रकृते न त्वसत्ता वाक्यार्थः जिज्ञासाजनकत्वं च जिज्ञासाप्रयोजकवोधजनकत्वं प्र
तिज्ञाजन्यवोधेन याविधेयजिज्ञासाप्रयोजकत्वं नु न याविधेयजिज्ञासाजनकीभूतं यत्तद्वह्निज्ञानजनकत्वज्ञानेनज्ञानकनयाएकसंवंधिज्ञानस्यापसंवंधिस्मारकतयातस्य तज्ज्ञानकत्वात्॥ अतो नानुपपत्ति
गंधो यो नित्येयं। अत्र मायावयवत्वे सतीति विशेषणमापश्यकं। अन्यथोदासीनवाक्ये नित्यापत्तिरिति। प्रतिज्ञालक्षणांतरमाहलिंगाविषयकेत्यादि। लिंगाविषयकत्वे सति यो लिंगिज्ञानजनक
वाक्यत्वमित्यर्थः। लिंगाविषयकत्वं चात्र सर्वेक्तमेव ग्राह्यं तेन न पर्वतो वह्निसामग्रीमान्वह्नेरित्यादौ प्रतिज्ञायामव्याप्तिः॥ लिंगिज्ञानं च लिंगितयाभिमतसाध्यवन्निष्ठविधेयताभिरूपितपक्षनिष्ठमुख्यवि
शेष्यताशालिज्ञानं बोध्यं॥ न ततो वह्निमान्वह्निसामग्रीमत्त्वादित्यादौ हेत्ववयवे ऽतिव्याप्तिः। अत्र विशेषणकृत्यमाह नेत्यादि। ह्नवयवानामितिसाकतिगमनादीनामित्यर्थः। अन्यथाः यं यद्यानुर्वगकरूपे

राम०

तत्रातिव्याप्तेरपरिहार इति भावः। विरोध्युपस्थापकं च पर्वतो वह्निमान् धूमादित्यादिविषयकज्ञानजन्यज्ञानीयं विषयतात्वादित्यादौ हेत्ववयवेऽतिव्याप्तिवारकं उदासीनवाक्यातिव्याप्तिवारणीयन्यायावयवत्वे
सतीति विशेषणमपि बोध्यं। केषांचिन्मतमाह यत्तिसाध्यमित्यादिरेव हेत्ववयवत्वादित्याद्यन्तापत्तेरन्त्यमवयवत्वादिपरिग्रहः। मतांतरमाह॥ प्रतिज्ञाजन्यमित्यादि व्यवहारादिति रूपेण प्रतिज्ञेत्यवहार-
हिसप्यर्थः। प्रतिज्ञावाक्यात् विजातीयबोधनानंगीकारे यत्तिज्ञान्यस्य दुर्वचनयानत्मकारकज्ञानासंभवेन तत्प्रकारकव्यवहारानुपपत्तेः व्यवहारं प्रतिव्यवहर्तव्यतावच्छेदकप्रकारकव्यवहर्तव्यज्ञानस्य हेतु-
त्वादिति भावः। अनुगतस्य मन्तरेणोतिज्ञनकतायाः जनकतावच्छेदकघटितस्य जनकताज्ञाने जनकतावच्छेदकज्ञानस्यापेक्षितत्वात्। विजातीयज्ञानजनकतावच्छेदकमनुगतधर्ममितरेणानयोरनुपपत्ते-
रिति भावः। तुल्यत्वेनेति। अनुमितिस्वरूपज्ञाननिरूपितविषयकत्वघटितोपदर्शितधर्मस्येत्यर्थः। अनुसरणीयत्वादिति विजातीयज्ञानजनकतावच्छेदकत्वेनावश्यं तत्राभ्युपेयत्वादित्यर्थः। तथा च तत्रानादे-
शधर्मस्यावश्यकत्वेन देव प्रतिज्ञात्वस्वरूपमस्तु न तु वैजात्यघटितमुपदर्शितत्वस्वरूपं तत्र वैजात्यकल्पने गौरवादिति भावः॥ एतेनेति। प्रतिज्ञाजन्यबोधमात्रवृत्तिजातौ प्रमाणाभावेनेत्यर्थः॥ शाब्दे-
अनित्यस्त्वादित्यनिगोधीयरपदन्यायावयवार्थकं न्यायघटकः निस्यत्वाकारकं यत्न्यायावयववाक्यजन्यज्ञानवृत्तिः जनकत्वादि साध्यवाजन्यतानाव। तत्तदुपस्थितयज्ञानजनकतावच्छेदकं

मयु० ८

तात्वमितिसमुदितलक्षणतावाक्यार्थः ॥ उदासीनवाक्यमन्यहानरतिजातिविशेषव्यावर्तनाय वृत्तित्वांतंजातिविशेषवत्तोभ्यायजन्यमहावाक्यार्थबोधवत्तिजातिवारणायः वृत्तित्वांतनिवेशः ॥ अत्रा
दिपदस्याल्पोपादानरणादेर्वैकल्पिकोपादानमवगंतव्यं ॥ नातो वैयर्थ्यापत्तिरिति न्यायेनप्रतिज्ञायानिः फलत्वमाशंकते । नन्विक्षिसादिनसाधनांगेन साधनस्य न्यायस्य अंगं घटिकात याचनिष्प्रयोजनत्वा
त् ॥ प्रतिज्ञानन्यायघटकेतिभावः ॥ ननुप्रतिज्ञायाअभावेपक्षेसाध्यवत्त्वस्य हातहेतुप्रतिज्ञासारस्यहेत्वाकांक्षाविरहत्वाच्चतद्भिधानेऽर्थांतरमितितत्राविधाकांक्षासंपक्षेसर्थप्रतिज्ञावशपक्षेस
तत्र हेविप्रतिपत्तेरिति विप्रतिपत्तिवाक्यादित्यर्थः ॥ पक्षपरिग्रहे पक्षेसाध्यवत्त्वग्रहे तत्र पक्षेसाध्यवत्त्वापाद्यमारात्तिज्ञासायातायत्किंत्तिज्ञासायांप्रथमादिति ॥ अथमोचित्वलादित्यर्थः ॥ तथाच
प्रतिज्ञायाअभावेऽपि उपहार्येतरीत्याहेत्वाकांक्षासंभवान्नप्रथमेहेत्वभिधानमयुक्तम अर्थांतरमितिप्रतिज्ञाप्रयोगोऽनिरर्थकइतिभावः ॥ विप्रतिपत्तेरिति मध्यस्थोक्तविप्रतिपत्तिवाक्यादित्यर्थः ॥ सप
यवधानांतरमितिहेत्वंतरालिउदाहरणाप्रयोगेनैवशब्दानित्यत्वेसाधनीयेइत्यादिनियमाभिलाषस्यसमयबंधानंतरमित्यर्थः ॥ शब्दानित्यत्वसाधयेनोत्यादि ॥ वादिनः ॥ प्रतिवादिनः आकांक्षाय
पक्षेशब्दनित्यत्वमितिहेत्वपमासाहितिशेषः ॥ साध्यमिति ॥ साधनीयमित्यर्थः ॥ साध्यनिर्देशंविना ॥ प्रतिज्ञांविनाहेत्वाकांक्षेहेत्ववयवः ॥ निष्प्रतियोगीकंनिर्विषयकं ॥ अन्वयंहेत्ववयवार्थबोधपि

राम० ८

तुरिष्ट इति भवतीत्यर्थः। तथा च हेत्ववयवार्थस्य साध्येन्वयबोधं विना निश्चितासाधारण्यानिश्चये हेत्ववयवार्थविशेष्यसाध्योपस्थित्यसत्त्वे प्रतिज्ञावश्यकीति भावः। ननु प्रतिज्ञयानुपस्थितं साध्यं योगपद्याव
स्थानं हेत्ववयवार्थस्य विशेष्यविधयाऽन्वेष्यतीति यत्तेहाप्रयोगेतिनिरर्थकं इत्याशंक्य निरस्यति नचेत्याहित्यादिवाक्ये प्रतिज्ञावाक्येऽनुपस्थितमपीति। साध्यमिति शेषः। योग्यतयेति हेत्ववयवार्थस्यवि
शेष्यविधयेति शेषः। अतिप्रसंगादिति। यत्र हेत्वनुपस्थितार्थस्यापि विशेष्यविधयाऽन्वयबोधांगीकारे वह्निविशिष्टसाध्यकधूमादित्यादि हेत्ववयवार्थस्य विशेष्यविधयाद्यलविशिष्टस्यापि अन्व
यप्रसंगादित्यर्थः॥ ननु विप्रतिपत्तिवाक्यघटकीभूतसाध्यपदाउपस्थिते साध्ये हेत्ववयवार्थान्वयसंभवात् साध्योपस्थित्यर्थं प्रतिज्ञाप्रयोगोऽनुचित इत्याशंकते। नचेति। समाधत्ते नस्यादिति। विप्रतिपत्ते
रित्यर्थः। अंतरितत्वादित्यस्य मतनेनान्वेति। प्रतिवादिविप्रतिपत्तौ पत्नेति उक्त। विप्रतिपत्तिरभावकोटावेव प्रमाणादिति प्रतिवादिनो विरुद्धप्रतिपत्तिजनकत्वान्नेत्यर्थः। प्रमाणादित्यवच्छेदेनैते मिथ्यापमेते
नैव मध्यस्थान्निस्पत्वेप्रमाणं वक्तव्यमिति समयबंधेन चेत्यर्थः। तथा च निरुक्तप्रतिवादिविप्रतिपत्त्यनिरुक्तसमयबंधेन च विप्रतिपत्तिघटकसाध्यवाचकपदेनोपस्थितिः। नाप्यागमनन्तसाध्योपस्थितिसं
भवइति भावः। ननु निरुक्तप्रतिवादिविप्रतिपत्तिनिरुक्तसमयबंधयोरावश्यकत्वेऽसत्त्वे संभवतीति नेत्येवमेषत आह यत्र विप्रतिपत्तिमित्यादि निरुक्तप्रतिवादिविप्रतिपत्तिनिरुक्तसमयबंधं विना स्थापना॥

९

म पु०
९

प्राथमिकस्यापप्रयोगस्याऽभावात्कथकसंप्रदायविरुद्धत्वादिति दोषः । न यावत्कथकसंप्रदायानुरोधेन तदुभयमावश्यकमिति भावः । अथ तथाविधकथकसंप्रदायेऽसिद्धे स्वतन्त्र आह विप्रतिपत्तिवा
क्यस्येत्यादि विप्रतिपत्तिघटकीभूतसाध्यवाचकपदस्य पक्षपरिग्रहे पक्षे साध्यवत्त्वसन्देहपर्यवसिततया जनकतया निराकांक्षत्वात् अनेनान्वयबोधकत्वेनाकांक्षाया अभावादित्यर्थः । तथा चाकांक्षाभा
वादेव न तु पक्षस्यापि तत्साध्ये न हेतुत्वान्वयासिद्धिभावः । ननु पक्षः साध्यवानित्यादौ विप्रतिपत्तिघटकीभूतपक्षः साध्यवानिति तस्य पुनः प्रतिसंधानस्यापादकत्वात् तु पक्षस्यैतत्साध्ये हेतुत्वपर्यन्वयो नानुपपन्न इत्यत आ
ह । आवश्यकं चेति । विप्रतिपत्तिस्थले कदेशस्य पक्षः साध्यवानिति तस्याकांक्षा ही इत्यर्थः सैवेति । आवश्यकत्वविषयीभूतपक्षः साध्यवानितिवाक्यप्रतिक्षेपे इत्यर्थः यथाश्रुतेऽप्यवहितत्वश्रुतशब्दस्य पुनरनुसंधानस्यावश्या
वश्यकत्वेऽपि निराकांक्षस्य शब्दस्य धर्मस्याभावादनुपपत्तेः । शंकते न चेति । अवयवान्तरात् उदाहरणात्पावयव घटकसाध्यवाचकपदज्ञानहेतुत्वान्वयबोधे योग्यत्वेनेति हेतुत्वावयवकार्यान्वययोग्यपदस्य । व्यतिरेक्युदाहरणे साध्यवाचकपदा
भावात्सर्वत्रोक्तरीत्यासाकांक्षोपस्थितेर्न संभवतीसतः प्रकारान्तरमाह नापीति । केचित्तु उदाहरणघटकीभूतसाध्यवाचकपदादुपस्थितसाध्ये हेतुत्ववयवार्थान्वयेऽपि पक्षः पुनः साध्यवानिति आकांक्षायामप्रतिवृत्ति
रतः प्रकारान्तरमाह नापीत्याहुः ॥ अवयवान्तरेण उपनयरूपावयवेन आक्षेपानुपपत्तौ हेत्वर्थान्वयानुपपत्त्या साध्यवत्तया पक्षस्यानुमानान्न हेत्वन्वययोग्यसाध्यस्योपस्थितिरित्यन्ये दूषयति दूर्वेराद्यन्वयः । अथ मा शंकायां राम०
९

शेषमाह साध्याभावपदेनि साध्ये हेतुत्ववत्पर्यवसानान्वये कथमस्यागमकत्वमित्याकांक्षायां द्वारद्वयं साध्याभिधानं उदाहरणाभिधाने च तद्द्वारीभूतसाध्यवाचकपदानन्तरसाध्योपस्थितिः सा साध्ये हेतुत्वं तत्परामर्शो मात्र
पदस्यार्थः नापीत्याहिति तीयवद्दलत्वं दूषयति तस्मादित्यादिना तस्मात् उपनयपदस्यावयवत्वात् प्रतीत्यसम्भव्यानुपपत्त्या तद्वाऽर्थस्य साध्यव्याप्यवत्त्वस्य पक्षधर्मतानिरस्त इत्यन्यथानुपपत्त्या प्रतीतासम्भव्यानुपपत्त्या चोप्र
तीतोयः स्वार्थः साध्यव्याप्यवत्त्वं तदन्यथानुपपत्त्या याश्चाक्षेपः पक्षे साध्यवत्त्वानुमाने इह हेतुत्वप्रयोगात् सर्वकालेनास्येव न संभवतीत्यर्थः । अयंभावः पक्षे साध्यवत्त्वं विनापि साध्यव्याप्यवत्त्वप्रती
तिसंभवात् उपनयार्थसाध्यव्याप्यवत्त्वप्रतीतिसम्भव्यानुपपत्त्या न तदाक्षेपसंभवेन कथं तत्पादानान्तरसम्पन्नं इत्यर्थं च उपनयवाक्यात् प्रतीते पक्षस्यार्थं व्याप्यवत्त्वेन तदन्यथानुपपत्त्या तदाक्षेपे साध्यवत्त्वकल्पनेन तस्योप
नयोत्तरकालीनतया हेतुप्रयोगपूर्वकालीनत्वसंभवादिति । इदं तु सामान्यविशेषौ कथंचित् स्मृत्वेव तत्त्वतस्तु तथाकल्पनासंभवेपि न क्षतिः । पक्षीयस्थितार्थस्येव शाब्दबोधे भानं नियमेन तद्योग्यस्थितार्थस्य हेतुत्वेन पक्षेनम्
याद्बोधे भानासंभवादिति । प्रतिज्ञाया ४ साधनांगत्वे निबंधकारमतमाह अन्ये त्विति । शाब्दानिसत्त्वं साधये स्वेव मध्यस्थस्य प्रश्नः सोयमहमपि करिष्यत आह प्रतीति ॥ मध्यस्थस्य उपलक्षणं प्रतिवादिनः
इत्यपि द्रष्टव्यं अनुयोगः प्रश्नः । नाकांक्षानपेक्षाविशिष्टयति । शाब्दानित्यत्वमाहकत्वविशिष्टं च तत्यर्थः । विशिष्टं चेति । शाब्दानित्यत्वग्राहकत्वविशिष्टं चेत्यर्थः । विशेषणतां साध्यमितीति शाब्दानित्यत्वबो

10

मथु० १०

धकवाक्यं विनेत्यर्थः नवाक्याभिधानमित्यत्र विशिष्टबोधाभिप्रायाय प्रयुक्तहेत्ववयवेन बाधप्रतिसंधानवत्त्वमित्यर्थः॥ तथा च हेत्ववयवानन्तरं यावद्विशिष्टबोधोपपत्त्यर्थं प्रतिज्ञाप्रयोग आवश्यक इति अन्यथा
तथाविधविशिष्टघटकीभूतपक्षज्ञानासत्त्वात् यद्वा उपस्थितिविनाशाद्बोधे मानाभावेन तथाविधविशिष्टविषयकशाब्दबोधासंभवादिति भावः ननु तथाविधविशिष्टेन प्रयुक्तः किंतु पक्षस्य साध्येन
रूपगतस्यान्वयबोधकं यत् प्रमाणान्तरं तत्रैव साकांक्षत्वेन चेन्निवर्तते नोपनयस्य गतार्थता साध्यमिति यच्छेदनिर्देशः आपादकं निराकरोति वादिद्वयसाध्य इति प्रतिवादिसाध्यविवादस्थल इत्यर्थः॥ न हि संभवतीति अनुभव
भावेन तथाविधप्रमस्याभावादित्यर्थः उपसंहरति तस्मादिति हेतोराकांक्षेति हेत्ववयवाभिधानप्रयोजकीभूतजिज्ञासेत्यर्थः नचैवं सति नवाद्यपदं हि तद्विशिष्टान्वयबोधजनकत्वमित्यर्थः साधनोपगमितिस
धनस्य न्यायस्य घटिकाद्यर्थः प्रतिज्ञानन्तरं हेतुरेवोपन्यास्यो न तूदाहरणमित्यत्र विनिगमकमाह साध्यनिर्देशानन्तरमिति साध्यज्ञानेत्यर्थः आकांक्षायां कुतः पर्वतो वह्निमानिति जिज्ञासा साध्यसाधनतावच्छेदकविभक्ति
मल्लिंगवत्त्वं नेत्याकांक्षाबोधकपंचमीविभक्तिमत्त्वमादिति बोधकशब्दप्रयोगरूपहेत्ववयवाभिधानं अन्यथा प्रतिज्ञानन्तरमुदाहरणाद्यभिधाने अनाकांक्षिताभिधाने अर्थान्तरापत्ति नामिधाने निग्रहः॥ अर्थान्तरासि
नाभिधानात्मकार्थान्तररूपनिग्रहस्थानप्रसंगात् ननु कुतस्तदाकांक्षायां हेत्ववयवप्रयोगे युक्ता भावरूपनिग्रहस्थान आह लोके इति न्यायप्रयोगातिरिक्तस्थल इत्यर्थः॥ तथैवेति यत्र जिज्ञासारूपाकांक्षानुद्बोधक

राम० १०

शाब्दप्रयोगेनैव संबंधः ॥ आकांक्षानिवृत्तेरिति । निराकांक्षाकांक्षानिवृत्तिरर्थः । तथा च स्थलांतरे तथा दर्शनात् प्रकृतेपि तथाविधाकांक्षायां हेत्ववयवप्रयोगे तथाविधाकांक्षा यात्र
निवृत्तिस्तन्निवृत्त्यर्थमुत्तरं हेत्ववयवप्रयोग आवश्यक इति भावः । हेत्ववयवत्वं स्मारयति अनुमितिकारणीभूतेत्यादि । अत्र प्रथमे जनकांतेन न्यायावयवार्थकत्ता च न्यायावयवत्वे सति साध्यविषयक
शाब्दधीजनकत्वे सति हेतुत्वप्रतिपादकविभक्तिघटितवाक्यत्वं हेत्ववयवत्वं ॥ अत्रोदाहरणवाक्येऽतिव्याप्तिवारणाय प्रथमसत्यंतं । निगमनेऽतिव्याप्तिवारणाय द्वितीयसत्यंतं । उपनये कुदाहरणेऽति
व्याप्तिवारणाय विशेष्यदलं । अत्र हेतुत्वप्रकारकप्रतीतिहेतुत्वाभिमतेन उपनयेऽतिव्याप्तिवारणाय विभक्तिपदं । ननु अत्र पर्वतो वह्निमान् वह्निसामग्रीमत्त्वादित्यादौ हेत्ववयवेऽव्याप्तिः तत्र साध्यविषय
कबोधाजनकत्वादिति चेन्न साध्याविषयकत्वे सति हेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतावहिर्भावे तथा साध्याविषयतानतिरिक्तत्वस्य विवक्षणात् । न च तथाविधविषयतावहिर्भावेने
त्यस्य दुर्वचत्वान्नैतत् संभवतीति वाच्यं । हेतुतावच्छेदकविषयताहेतुविषयताहेतुत्वविषयतैतत्त्रितयभिन्नत्वस्य तदर्थत्वात् । ननु तथापि रागवत्त्वादिसाध्यस्थले हेत्ववयवेऽव्याप्तिः तत्र त
थाविधविषयताभिन्नायां साध्यात्मकसुखप्रतिभप्रत्यक्षविषयताया अनवच्छिन्नत्वादिति वा व्यंजनरागवचनम्यवबोधकत्वेनैतद्विशिष्टस्य तद्धर्मत्वान्न तथात्वं रागवत्त्वमवबोधकत्वमित्यविशि

11

मथु० ११

घस्यातदर्थत्वात् तथा चेतरान्वयवज्जन्यबोधवृत्तिविशिष्टसाध्यविषयताश्रयत्वपर्यन्तं बोधजनकत्वे सति उपदर्शितविशेषणविशिष्टपञ्चावयवत्वहेत्ववयवत्वमिति लक्षणनिष्कर्षः। न चात्र साध्यपदस्य

र्थमिति वाच्यं। यथासन्निवेशे वैयर्थ्याभावात् तथापि निष्प्रयोजनं तदित्याशंकनीयं। विशिष्टफलसार्थक्यस्य तत्प्रयोजनत्वात्॥ लक्षणांतरमाह हेतुत्वप्रतिपादकेति स्वार्थे हि तुल्यमुख्यविशेष्य

तान्वयबोधजनकविभक्तिमत्त्वापावयवत्वं हेत्ववयवत्वमित्यर्थः। अयं त्रिगमनेऽतिव्याप्तिवारणाय मुख्येति प्रकारताभिन्नेत्यर्थः। हेतुत्वं प्रमेयं इति प्रतिज्ञांशे अतिव्याप्तिवारणाय विभक्तीति पदं न च तथापि वह्निः

धूमात् धूमव्यापकवत्त्वादित्यादौ तस्मात् धूमादिति निगमने ऽतिव्याप्तिरिति वाच्यं तयोः परस्परान्वितस्वार्थविषयकवाक्यार्थबोधजनकत्वस्यानुसन्धानपातत्वप्रसिद्धताघटकधूमात् शब्दार्थे हेत्ववयवार्थान्व

यस्यासंभवेन तथाविधस्वार्थप्रयोगाभावात्॥ न च तथाविधधूमसत्त्वे मानाभाव इति वाच्यं तथा सति द्वित्वमतेन भूतले घटस्येत्यादिवाक्यादपि घटवृत्तिभूतलत्वविशिष्टभूतलवृत्तिघटसंबंधस्याधेयान्वयबोधप्रसं

गात् न चैवं सन्निकर्षाच्चैत्रस्य धनमित्यत्र षष्ठ्यर्थस्वत्वेन स्वत्वत्वेन रूपेण पंचम्यर्थस्यान्वयप्रसंग इति वाच्यं तत्र चैत्रपदस्य चैत्रसत्त्वेन लाक्षणिकतया चैत्रपदार्थस्वत्वस्य एव पंचम्यर्थान्वितत्वात् न च चैत्रपदस्य चैत्रस्व

त्वलाक्षणिकतया षष्ठ्यर्थस्वत्वेन स्वान्वयप्रसंग इति वाच्यं अभेदसंबंधेनैव तत्र तथान्वयसंभवात्। अपि च यथावा तत्र षष्ठ्या आश्रयत्वेन लक्षणा तथा तत्र निरूपितत्वसंबंधेन चैत्रपदार्थस्वत्वस्यान्वयसंभवेन। राम० ११

नुपयसमावहति। तत्स्मरणानंतरमाह। उदाहरणेत्यादि। उदाहरणप्रयोजिका उदाहरणजन्यबोधनिवर्त्याया जिज्ञासा तस्याः कार्यं क्षमानजनकशाब्दज्ञानजनकत्वापादकत्वं हेत्ववयवत्वमित्यर्थः। अत्रेनरावय
वेऽतिव्याप्तिवारणाय प्रथमजनकत्वांतं शाब्दबोधविशेषणं। तत्स्मरणानंतरमाह साध्याविषयकेत्यादि। अत्रानुमितिपरशब्दोऽन्त्यावयवार्थकः। साध्याविषयकज्ञानजनकत्वे सति हेतुपंचम्यंतन्यायाव
यवत्वं हेत्ववयवत्वमित्यर्थः। अत्र घटो न इत्यादौ महानसीयो वह्निर्न धूमादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय सप्तम्यंतं पूर्वोक्तार्थकं व्यतिरेक्युपनये ऽतिव्याप्तिवारणाय हेतुपंचम्यंतत्वोपन्यासः। अत्र
हेतुत्वप्रतिपादकपदार्थकहेतुपदपंचमीपदयोर्वैकल्पिकोपादानान्नान्यतरवैयर्थ्यं। न चैवं सति यत्र शब्दो हेतुत्वप्रतिपादकविभक्तिघटितशब्दत्वाभाववान् विभक्तिघटितशब्दत्वाभावात् तत्राव्याप्तिर्यत्र
यत्र हेतुत्वप्रतिपादकविभक्तिघटितशब्दत्वं तत्र विभक्तिघटितशब्दत्वं यथा वह्निमान् धूमादित्यत्र वह्निमद्वृत्तितिशाब्दरपदार्थान्यालिनि उदाहरणेऽतिव्याप्तिरिति वाच्यं उदाहरणान्यत्वेन विशेषणात्। तत्
स्मरणानंतरमाह प्रतिज्ञावाक्येत्यादि। प्रतिज्ञावाक्यजन्यशाब्दबोधजन्या या उक्तो वह्निमानित्याकारिका जिज्ञासा तस्याः कार्यं क्षमानंतर्वर्तिकशाब्दबोधजनकत्वे सति हेतुविभक्तिमन्न्यायावयवत्वं हेत्ववयवत्वमित्यर्थः। प्रतिज्ञा
दावतिव्याप्तिवारणाय सप्तम्यंतं निगमनजन्यबोधस्यापि तादृशजिज्ञासानिवर्तकत्वरूपयोग्यत्वात् तत्रातिव्याप्तिवारणाय हेतुविभक्तिमदिति। निगमनद्यपर्यन्तहेतो रबाधितत्वादिबोधहेतोः या विभक्तिः तद्घत्यार्थक

12

मयु०

१२

नहुलद्र्वन्हिनिगमनाभावस्तमिलितेतुपर्यवसितार्थः उदासीनतयाकोऽनिव्याप्तिवारणायव्याप्यावयववत्वेऽपि । न स्मरणांतरमाहपंचमपंचमेनत्वास्मरणिकेनिपंचमपंचमेनतेयत्कृत्वात्स्मरणिकेपदंतंतत्वघटितमाद्यावयवत्वेहे
त्ववयवत्वेतस्मान्नवन्हिमानितिनिगमनस्यपंचम्याअपिज्ञाप्यत्वेनास्मरणिकत्वयास्मरणिकपंचमीयद्दच्छियमने ऽनिव्याप्तिवारणायपंचम्यंगेमीनितुदोषविनिकुंजः ॥ तत्रसर्वनामपदस्यत्वावतानघट
त्वादिरूपज्ञानविशिष्टशक्तत्वयानिगमनस्यच्छन्तसद्दस्यवन्हिव्याप्यधूमादिज्ञानत्वास्मरणिकत्वेनतद्दानेयितत्रानिव्याप्तिवारणाशकात्वास्मरणिकपदस्यप्रकृतहेतुतावच्छेदकातिरिक्तधर्मानवच्छिन्न
हेतुविषयताकज्ञानत्वास्मरणिकार्थविशेषकत्वेनैवतत्रानिव्याप्तिवारणसंभवेपंचम्यंतपदस्यतत्रव्यावृत्तिरसंभवात् किंतुपर्वतविशेष्यकज्ञानंसविषयकंपर्वतादिसाद्येसविषयकत्वस्याप्यर्थविधान
यत्त्विसुयतयेऽनिव्याप्तिवारणायपंचम्यंतपदोपादानं तुल्ययुक्त्यात्रापंपदस्यपर्वतविशेष्यकज्ञानत्वास्मरणिकत्वात् । अपंदंडात्जातोघटइत्यादिसादृश्येप्रतिज्ञायांअतिव्याप्तिवारणायत्वास्मरणिकेतिन
चैवमपिधूमात्वन्हिमतः सधर्मापर्वतोवन्हिमान्धूमादित्यादौप्रतिज्ञायामतिव्याप्तिरितिवाच्यं पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितसाध्यविषयतानिरूपितस्वार्थविषयताशालिबोधजनकपंच
म्यारब्धपंचमीपदेनविवक्षितत्वादितिनस्मरणांसंगमयति । हेतुपदेनेत्सादिज्ञानत्वस्मरणात्धूमादिज्ञानत्वस्मरणात्हेत्ववयवेस्मरणसमन्वयइतिदोषः ॥ ननुहेतुस्वच्छधूमादिपदस्यतत्रत्वास्मरणिकत्वेय राम०

१२

मारणाभावदृत्सनत आह अन्यथेति तस्य तद्दलावत्तरितकत्वेदृस र्थः। लिंगस्याहेतुत्वेनेति। धूमादेः साध्यतानाजनकत्वेनेत्यर्थः हेतुविभक्त्यानन्वयादित्तिधूमादिपदार्थान्वितयंचमीविभक्त्यर्थस्य ज्ञाप्यत्वस्य सा
ध्ये: नन्वयप्रसंगादित्यर्थः बाधादित्तिभावः। ननु तस्य साध्ये: नन्वयेकाप्तत्तिरित्यत आह नचैवेति साध्ये हेत्वन्वयवार्थस्यान्वये नैवेत्यर्थः। आकांक्षायाः निवृत्तेः कुतो वन्हिमानितिजिज्ञासायाः निवृत्तेः। मया
वता दृशाजिज्ञासायानिवृत्यर्थसाध्ये हेत्ववयवार्थान्वयबोधस्यावश्यकत्वे पानप्यावक्रुमशक्यत्वादित्तिभावः। एतनमनेव धूमादिज्ञानस्यानुमितिकरणतापक्षे तेयंतायमानलिंगकरणतावादिनयेतु धूमादिप
दस्यत्वा वस्तिकत्वाभावेपिनानुपपत्तिगंधइति ध्येयं। कस्यचित्तु व्वाणामाह अनुमितीति तादृशानुमिति जनकीभूतं यत् शाब्दज्ञानं तत्र जनकीभूतं यत् धूमवत्त्वादिति वाक्यजन्यज्ञानं तद्वृत्तित्वे सति मतितोदाह
रणादिवनुषयजन्यतानावच्छिन्नयजातिमत्त्वं योगीतानजनकवाक्यत्वं हेत्ववयवत्वमितित्व हस्तरणवाक्यार्थः। अत्र धूमवत्त्वादित्याद्युदासीनवाक्ये अतिव्याप्तिवारणाय समवेतं जातिविशेषणं समानुपूर्वीकत्वं वाद
त्वादिमाह्रायमतितादृशेतिव्याप्तिवारणाय अवृत्तित्वांतं जातिविशेषणं। अत्रमतितादिवतुपूर्ययस्यैवैकाल्पिकोपादानं वो ध्येनामएकतरानिवेशो अस्यैवव्यर्थापत्तिः एतेनेदमतेदूषयत्तिजातिविनेति अनुमितिज
नकतावच्छेदकत्वेन सिद्धांयरामर्शत्वाख्यः जाति विनेत्यर्थः। तानस्येति यतितादृशंचवाक्यजन्यमहावाक्यार्थबोधस्येत्यर्थः। अयंभावः परामर्शत्वरूपेयातथाविधमहावाक्यार्थबोधस्य हेतुत्वेन संभवति

13

म॰पु॰ १३

परामर्शत्वजातिसत्त्वेमानाभावात् तत्तद्व्यक्तित्वरूपेणानुगतस्य तत्रजनकत्वे तु प्रमाणाभावः तथा च तथाविधमहावाक्यार्थबोधस्य अनुमितिजनकत्वासंभवेन लक्षणासंभवस्तत्त्वमिति भावः ननु एवं सति कारणो
तन्निवेशं विनैव लक्षणे करणीयमित्यत आह वाक्यविशेषजन्यत्वस्यापीति निष्पादपक्षघटकीभूतयुक्तवाक्यादीति शब्दविशेषजन्यत्वस्यापीत्यर्थः अन्यतावच्छेदकरूपापरिचयइति उदासीनवाक्यजन्यबोधस्या
वृत्तिजन्यतावच्छेदकं विनेत्यर्थः दुर्ग्रहत्वात् अतिव्याप्तिवारकत्वेन दुर्ग्रहत्वात् अतिव्याप्तिवारणाशक्यत्वादिति यावत् तथा चोदासीनवाक्यजन्यबोधस्याप्येतज्जन्यतायां घटकीभूततथाविधवाक्यजन्यत्वं लिङ्गज्ञानि
विशेषप्रमाणाभावान्न लक्षणमुदासीनवाक्येऽतिव्याप्तमिति भावः। वस्तुतस्तु धूमवत्त्वादिति वाक्यजन्यशाब्दबोधवृत्तिजातिविशेषे प्रमाणाभावेन तथाविधलक्षणासंभवदुक्तिकमिति ध्येयं हेतुत्वपव
स्यसामान्यलक्षणामुक्त्वा विशेषलक्षणमाह अन्वयेत्यादि अन्वयव्याप्तिबोधकशब्दाभिधानप्रयोजकानि ज्ञानानि जनकत्वे सति हेतुमत्तिपादकविभक्तिमच्छब्दत्वं अन्वयिहेत्वव पयवत्वमित्यर्थः अत्र धूमादा
लोकवान् पर्वतो वह्निमानित्यादि प्रतिज्ञायामतिव्याप्तिवारणाय सत्यंतं जनकत्व मत्र फलोपधायकत्वं बोध्यं नातः स्वरूपयोग्यतामादाय तद्दोषतादवस्थ्यं पत्रोऽशाहरणानमेव प्रयुक्तं तत्र सहेतो रलक्ष्यत्वा राम॰ १३

तत्रातिव्याप्तिवारणाय हेतुत्वप्रतिपादकेत्यादि विशेष्यदलं हेत्ववयवार्थकं। अत्र हेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रावयवत्वमिति पादरत्नप्रामाणिकः विभक्त्यंतरस्याप्यावश्यकाभावात् व्यतिरेकिहेत्ववयवल
क्षणमाह एतदेवेति अव्यवहितोत्तरत्वघटनमेवेत्यर्थः व्यतिरेकेत्यादि। अन्वयव्याप्त्यभिधायकत्वविशेषणं दूरीकृत्य व्यतिरेकव्याप्त्यभिधायकत्वं विशेषणदानेन इत्यर्थः। अन्वयव्यतिरेकिहेत्ववय
वलक्षणमाह अन्वयव्यतिरेकीत्याह हरणेत्यादि अन्वयव्याप्त्यभिधायकशब्दप्रयोजकजिज्ञासाजनकत्वे सति व्यतिरेकव्याप्त्यभिधायकशब्दप्रयोजकजिज्ञासाजनकं यत् तत्तज्ज्ञानजनकहेत्ववयवत्वं अन्वय
व्यतिरेकिहेतुत्वमित्यर्थः यदि च कुतोऽस्य गमकत्वमित्याकांक्षायाः एकव्याप्त्यभिधानेनैव निरस्तत्वात् व्याप्त्यन्तराभिधानेऽर्थान्तरं स्यादिति एकदा उभयव्याप्तिबोधशब्दप्रयोगाभावेन लक्षणासंभव
स्तमिति विभाव्यते तदा हेतुपदेन पक्षवृत्तित्वे सति सपक्षवृत्तित्वे सति विपक्षावृत्तिर्यो हेतुस्तद्बोधकहेत्ववयवत्वं अन्वयव्यतिरेकिहेतुत्वमित्यर्थः अत्र स्वरूपासिद्धहेतुबोधकआभासीभूतहेत्ववयवे अ
तिव्याप्तिवारणाय प्रथमसत्यंतं व्यतिरेकिहेत्ववयवे अतिव्याप्तिवारणाय द्वितीयसत्यंतं तत्र सपक्षत्वं निश्चितसाध्यवत्त्वं व्यभिचारिहेतुबोधकआभासीभूतहेत्ववयवे केवलान्वयिहेत्ववयवे चातिव्याप्तिवार
णाय विपक्षावृत्तित्वं तेन विपक्षत्वमत्र साध्याभाववत्त्वं निश्चयार्थानिवेशप्रयोजनाभावादिति एतन्मते पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवस्यान्वयव्यतिरेकिन्याये केवलान्वयिहेत्ववयवलक्ष

15

मथु०
१४

णांनत्रानित्यापमतः केवलान्वयिहेत्ववयवलक्षणांतरमाह अत्यंताभावेतिवृत्तिमदत्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणयत्वेवृत्तिसपक्षवृत्तिहेतुबोधकहेत्ववयव
त्वंकेवलान्वयिहेतुत्वमित्यर्थः एतन्मते केवलान्वयिसाध्यकहेतोरेवात्रलक्षणपदानानुपपत्तिः अत्रान्वयव्यतिरेकिहेत्ववयवातिव्याप्तिवारणायानवच्छेदकांतं साध्यतावच्छेदकविशेषणं आकाशाभावसा
ध्यकहेत्ववयवेऽव्याप्तिवारणाय वृत्तिमत्त्वमत्यंताभावविशेषणं सर्वमभिधेयं प्रमेयत्वादित्याद्युपसंहारहेत्ववयववारणाय निश्चितसाध्यवद्वृत्तित्वरूपसपक्षवृत्तित्वं हेतुविशेषणं इत्थं च विशेषव
त्त्वादिसाध्यकधूमादिहेतोरन्वयित्वमंगीकुर्वतामाचार्याणांमतमाह यद्वेत्यादि अत्रोदासीनवाक्यातिव्याप्तिवारणाय कारणांतं व्याप्यवाचकपदार्थकं धूमात्त्वद्वह्निमतः सधर्मापि पर्वतो वह्निमान् धूमादित्यादौ व्य
तिसायामतिव्याप्तिवारणाय जनकांतं शब्दविशेषणं तदर्थस्तु पूर्वोक्तहेत्ववयवसामान्यलक्षणावच्छेदकत्वः नात्रवह्निमान्वह्निसामग्रीमत्त्वादित्यादौ हेत्ववयवेऽव्याप्तिः व्यतिरेकिहेतावतिव्याप्तिवार
णाय प्रतीतेत्यादि प्रतीतः साध्यान्वयः साध्यसहचारमात्रं यत्र एतादृशं यत्साधनं तद्बोधकेत्यर्थः प्रतीतान्वयसाध्येत्यादिपाठेपि साध्यपदस्य प्रसंगेनान्वयं कृत्वा पूर्वोक्त एवार्थो बोध्यः एतन्मतेऽन्वयव्य
तिरेकिस्थलेपि कदाचित्व्यतिरेकिव्याप्तिप्रयोगात्सर्वत्र व्यतिरेकिहेत्ववयवलक्षणमतिव्याप्तमतस्तल्लक्षणांतरमाह एतदेवेत्यादि इमुपलक्षणं एतदेव प्रतीतो न मया सहचारस्तु पाठहानात् अन्वयव्यतिरे राम०
१४

विहेतुत्वस्य तामिसपि इष्टत्वं अतः पर्वतो वह्निमान् धूमादित्यत्र धूमहेतोरेकदेशविशेषणान्वयव्यतिरेकित्वेपि न क्षतिः ननु प्रतिज्ञादित्रयावयववादिनां मीमांसकानां मते हेतोः पक्षवृत्तित्वभानार्थमुप
वत्वादिति मतनुसंबंधिहेतुप्रयोगोत्तरप्रतिज्ञादियं चावयववादिनां नैयायिकानां मते तु कथं सत्वं तेषां मते ऽपि नयवाक्यादेव हेतोः पक्षवृत्तित्वलाभात् अतो नैयायिकमते मनुपसंबंधिहेतुप्रयोगाभावे इ
पत्तिमाहकथायां निगमनादिना प्रतिवादिनो विचारे इत्यर्थः सामान्यवत्वे हेतुस्वरूपशाब्दाभिसामान्यसामान्य इत्यादिः इत्यपार्थकविशेषणद्वितीयहेत्ववयवोऽन्वयबोधाजनक इत्यर्थः एतदेव प्रतिपादयति विभज्योपन्या
येमेनेत्यादि हेतुत्वेनेत्स्यानन्वयादित्येनेनान्वयः विभज्योपन्यासादावर्हृत्प० सति सप्रम्यर्थकालीनत्वाद्यन्वितत्वान्यायास्यतु विभज्य पर्यवसितहेतुविभज्योपन्यासार्थस्यान्वयेनिराकांक्षत्वयाउपदर्शितस्थले सामा
न्यवत्वविशिष्टवाक्येंद्रियकरणकप्रत्यक्षविषयत्वरूपविशिष्टहेतोर्घटस्यार्थहेतुत्वस्य विशेषणेनान्वयासंभवेनान्वयासंभवात्तत्राविधविशिष्टहेतुत्वेनादृष्टहेतुप्रयोगोनकर्तव्य इति भावः सप्तमीव
त्वादितिसामानाधिकरण्यार्थकसप्तिसप्तम्यादिस्यर्थः उपस्थितत्वादिति सप्तम्यामिति शेषः विशिष्टहेतुत्वान्वयादितिसामानाधिकरण्यसंबंधेन सामान्यवत्वविशिष्टतयाविध प्रत्यक्षविषयत्वरूपहेतावित्स
र्थः॥ हेतुत्वान्वयादितिपंचम्यर्थहेतुत्वान्वयसंभवादित्यर्थः तथा चयत्रविभज्यार्थः संबंधमर्पणीयानभासनेनतत्रैवोपदर्शितसुप्रत्यवकाशः एवंचप्रकृतेसप्तम्यर्थसामानाधिकरण्यसंबंधेनतथा

15

म॰ यु॰ १५ विषयस्य स्वविषयत्वान्वितसामान्यवत्त्वेपंचम्यर्थस्यहेतुत्वस्यान्वयसंभवात्तादृशविशिष्टहेतुत्वस्थलेतथाविधप्रयोगोनानुपपन्नइतिभावः ननुतथान्वयस्वीकारेनामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधा
भावइतिव्युत्पत्तिविरोधइत्यतआह तथैवेति अभेदातिरिक्तत्वस्यैवविभक्त्युपस्थापितनामातिरिक्तत्वस्यापिनिवेशोनैवस्वार्थः सुत्यजः नामार्थयोरन्वयबोधाभावव्युत्पत्तिकल्पनात् ननुसतिसप्तम्याश्चेदैशिक
संबंधघटितसामानाधिकरण्यमर्थस्तर्हिएवंसंभवतितद्वनगोयुत्तद्यमानत्वाद्यागतइत्यत्रकालीनत्वार्थकत्वेनतत्विशेषतयादिरूपमतआह नहीत्यादि अयमर्थः दैशिकसंबंधघटितसामानाधिकरण्यरूपार्थः अ
स्मात्शाब्दात्सतिसप्तमी यत्रतत्रयाचसतिसप्तम्याः नानार्थकत्वमितिभावः ननुहेतुप्रयोगानंतरंख्यातिबोधकमुदाहरणमेवयपुत्पत्तेनतूपनयइत्यत्रविनिगमकाभावः व्याप्तेरिवपक्षधर्मताया अपिग
मकत्वोपपत्तेःकत्वादित्यतआह हेत्विन्यादि अस्यलिंगत्वानस्यकृत्स्नाकांक्षापारगते जिज्ञासापामाप्यत्वात्परामर्शार्थ्यापेक्षः अयमोपस्थाप्यसाधनत्प्रदर्शनायव्याप्तिप्रदर्शनायउदाहरणोपनयात्सूत्रेमुदा
हरणप्रयोगः वस्तुतस्तुकथमस्यगमकत्वमितिसाकांक्षायाः किंप्रकारकंलिंगत्वानंगमकमित्यर्थकत्वेपक्षधर्मतायाः प्रदर्शनेमेवनप्रसक्तमस्तिइतिध्येयं। अनुमितिसाहित्यत्रजनकानमुदासीनवाक्य
वारकंस्यापावयवार्थकंव्याप्यत्वाभिमतवह्निपदंमकत्वहेतुविशिष्टविषयंनियतव्यापकत्वाभिमतेतिनियतस्यसाध्यनियतस्यहेतोर्व्यापकंतत्विशिष्टसाध्यस्यार्थः तथाचव्याप्यावयवत्वेसतिमहत्त्वेहेतुमनि राम॰ १५

प्रकृते हेतुव्यापकत्वविशिष्टसाध्यसंबंधबोधकवाक्यत्वमुदाहरणत्वमित्यर्थः उदाहरणवाक्यान्तर्घटकीभूतत्रीण्यासममिथ्यात्वानुसाध्यबोधकपदस्य हेतुव्यापकत्वविशिष्टसाध्यत्वप्रकारकनयात्त
याविधव्यापकत्वविशिष्टबोधो हि यत्रात्र लक्षणसमन्वयः। अत्र हेत्ववयवादावतिव्याप्तिवारणाय प्रकृते हेतुविशिष्टेत्यादि उदाहरणसामान्यलक्षणमुक्त्वा तद्विशेषयोर्लक्षणमाह साध्येत्यादिसाधन
संबंध ४ साध्यनिष्ठसाधनव्यापकत्वावगाहित्वे सति वीप्सावद्वाक्यत्वमन्वय्युदाहरणत्वमित्यर्थः साध्यसाधनाभावेनिर्दिष्टं द्वापरः श्रूयमाणः पादः प्रत्येकमपि संबध्यते र निरूपसाध्याभावसाधनाभा
वेत्यर्थः संबंधो व्यापकत्वेन यावच साधनाभावनिष्ठसाध्याभावव्यापकत्वावगाहित्वे सति वीप्सावत्वाक्यत्वं व्यतिरेक्युदाहरणत्वमित्यर्थः अत्र लक्षणद्वये वीप्सावत्त्वविशेषणानि वेशात्तोपनयातिव्या
प्तिः प्राचीनमतेनाह न्यायेत्यादि न्यायावयवत्वे सतीय व्यापद्य पक्षिन्नवृत्तिस्वार्थबोधकत्वमतोजत्ययमावस्यतत्पद दृष्टांतवचनत्वमुदाहरणत्वमित्यर्थः दृषयति नेतिसामप्रिकत्वेनेति मयासद दृष्टांतमे
वोदाहरणं प्रयोजकम् अभित्पाभिलापविशेषवाने यंत्रितत्वेनेत्यर्थः असावत्रिकत्वात् सर्वत्रोदाहरणवाक्यघटकस्याभावान्ननुदृष्टांत भूयोदाहरणात्मकं यं व्यापकत्वबोधः साध्यबोधकपदेनानन्तावोध
नेनस्यैव नासर्वग्राहकत्वादि सनत्राहयोयोग्यमवानिरणादि इत्येवरसाकारकवाक्यादे वा। व्याप्तिप्रमितेः व्यापकत्वप्रमितेः न यावती व्याप्यत्वानत्यासर्पण्या हत्वादिति भावः नापि साहित्यमा

16

म॰मु॰ १६

ध्यानुमितिप्रयोजकोदाहरणात्वमित्यर्थः केषांचिन्मतमाह अत्रेसादि उपनयापि यात् व्यकतस्य स्तकानुमितिजनकज्ञानविषयीभूतव्याप्तिबोधकत्वे सति न्यायावयवत्वं तस्य स्मारकत्वेनसान्नप्रयो
जिज्ञासाजन्यबोधनिवर्त्तकत्वाभिज्ञासापक्षः साध्यव्याप्यवानयं वैसाकारान्तज्ञानकत्वे सति न्यायावयवत्वमुदाहरणात्वमित्यर्थः सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह तत्र द्वेधेति उक्तलक्षणमेवेत्यर्थः;
अन्वयेसादि अन्वयव्याप्तिविषयकबोधजनकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वमन्वयुदाहरणात्वं व्यतिरेकव्याप्तिबोधकोपनयप्रयोजकजिज्ञासाजनकत्वे सति न्यायावयवत्वं व्यतिरे
क्युदाहरणात्वमिति क्रमेणाविशेषलक्षणाद्वयमवगन्तव्यमित्यर्थः उदाहरणवाक्याज्ञव्याप्तिः प्रतीयते न तु पक्षधर्मता वा तत् साध्यबोधकपदस्य व्यापकत्वविशिष्टलक्षणाकल्पने गौरवात् किंतु साध्यसाध
नयोः सहचारमात्रं तस्मात् प्रतीयते व्याप्तिस्तु परस्परद्वये न चतद्वत्वं तन्न भिन्नत्वादिरूपविरुद्धधर्माभ्यां तत्तदधिकरणबोधनात् तत्तदधिकरणमन्तर्भाव्य सहचाराज्ञानेन तत्तदधिकरणमन्तर्भाव्य व्यभिचारशंका
निवर्त्तकमतो न तत्रैयकवाक्यप्रयोगे पर्यनरंनेसाच्चापमितमाह अत्रेसादि व्यभिचारकारणायतत्तदधिकरणमन्तर्भाव्य व्यभिचारत्तानवारणाप वीप्सा उपदर्शितविरुद्धधर्माभ्यां तत्तदधिकरणबोधकं राम॰
यत्परद्वयं तत्त्याश्रयो योयस्मवान्सवान्हिमानित्युदाहरणवाक्यघटकीभूतयत्पदद्वयो यस्यापि तत्तदधिकरणमन्तर्भाव्य धूमवत्त्वस्य वह्निमत्त्वस्य च व्याप्तिं बोधयति महिस्याद्याकारकबोधस्य उदाहरण १६

वाक्याज्ञा यत्नेनानुमाप्तिबोधः अन्वयव्याप्तेरेवानुमितिगमकतया व्यतिरेकव्याप्तिबोधकोदाहरणाप्रयोगः यौन संस्यादिति भावः आहुरित्यनेन सूचितमस्वरसमाह यत्तद्वे साध्यस्य तद्वृत्तिसामानाधिकरण्या
देवेतिसाध्यहेत्वोः सहचारमात्रादेव सर्थः व्याप्तिः व्यभिचाराभावः न वाप्यसौ तिथीप्रसाध्यर्थास्यादित्यर्थः यच्चैतादृशं प्रमेयं गगनत्वात् इदं द्रव्यभिन्नं गगनत्वात् इत्यादावित्यर्थः यच्चैतादृशं प्रमेयं गगनत्वा
त् इदं द्रव्यभिन्नं गगनत्वात् इत्यादावित्यर्थः यच्चैतादृशं प्रमेयं गगनत्वात् इदं द्रव्यभिन्नं गगनत्वादित्यादावित्यर्थः अत्र एकस्यैवाधिकरणस्य हेत्वधिकरणतया विरुद्धधर्मप्राप्तेर्हेत्वधिकरणीयस्यापना
संभवेनानुपयस्यापकवीप्साप्रयोजनाभावात् इत्याहाचार्यमते अस्माकं तु गमकतौपयिकहेतुव्यापकत्वबोधनात्सर्वग्राहकत्वेनैव नन्साधकत्वमिति भावः हृद्यरागान्तरमप्याहुर्वीप्सायामपीति नीप्सितयत्तयहा प्रांगादि
रुद्धत्वमद्धर्मप्यांतत्त्वदधिकरणीयस्यायनेनैव सर्थः व्यभिचारनाद्वस्व्याप्तिमिति। व्यभिचारत्वानसंभवादित्यर्थः न यावच्चात्र यावाभावावगाहित्वहस्येव विशिष्टबुद्धिविरोधितया उदाहरणावाकान्तधूमवत्त्व
त्वरेव वह्निमत्त्वप्रमवत्व चत्वराभिन्नं वह्निमदिति बोधोदये व्यभिचारत्वानोऽसंगौ बाधकाभावान्न चेयं व्यभिचारत्वाननिवर्तकबोधोपयिकत्वे वीप्सायादिति भावः ननु यदि वीप्सायां तथाविधव्यापकत्वबोधना
त्सर्वग्राहकत्वेन तत्स्यादेवीप्सा अनुचिता किं तु प्रथमपक्षरस्य साको हृस्त्वसंयस्य धर्मरूपक एवनत्वदयप्रयोगाऽचितः मम नेनुनत्र प्रपंच यपे वीप्सा अप्रयाविरुद्धप्रांधर्मासुमुपस्थितानेन न तदधिकरणा

17

मधु॰
९

नांशकेन तत्सदृशेनोपस्थापनासंभवात्तत्सदृशदुःखत्वेनेत्याद्युक्तमनेनैव तत्त्वत्रेवापत्तिमाह। हवीष्यत्वेनेतिवन्मनेऽपि तत्र वोध्याम्यपीत्याह विरोधाभावे वापि योग्यतानिविरूढधर्माभ्यामुपस्थितनामाधिकरणा
नामिस्पर्धा। नरारेनेतिरावेनेनत्सरेहेनेस्पर्धः परामर्शानिरुपस्थितिसंभवात् ननुसदृशदुःखत्वेनेत्याद्युक्तनिमं गर्हणत्वमाहबुद्धिस्थेत्यादि। नहादि सर्वनामपदस्पेत्यादिः नरूपान्तविरोधरहितान सदृशदुःख
त्वेनेत्याद्युक्तनिविरोधरहस्पर्धः। नत्वाविधयुक्तेनेरेन हविरिति स्थलत्वाद्विनिभावः नहूपरेवीक्षाभावेसाधकमाह यत्वेत्यादिना नुवीक्षा पदेनन सर्वेनहाकर्यसंचारितानि शैपदिरेवरात्रीयंयंच्यतीयायपति
वरासा। नरेंद्रमागादिहरवम्रपेदेविवरीभावंससम्भूमिपालरसत्रननसर्वेहेवीक्षासंगतिंरिति चेतन्नयनतत्सरेनवीक्षाइतिनसामान्यनियमः किंतुवीक्षितयत्पदसमभिव्याहारेतासमभिव्याहृतपदार्थता
वच्छेदकस्यायकत्वं यत्रवोध्यतेतत्रननस्यदेवीक्षाइतिनियमः यंयंव्यतीयायरसाहेनुवीक्षितपदसहसमभिव्याहारेतायस्पदसमभिव्याहृतपदार्थतावच्छेदकमहीपालत्वस्यापदकत्वं नबोध्यते। किंतुमही
पालवर्जितद्वन्द्वनिद्वन्द्वसमभिव्याहृतनत्वधर्माभ्यां केन्वचनमहीपालारावयससहाभ्यांवोध्यंतेप्रयोगानुसारित्वात् कल्पनायाइतिनानुपपत्तिगंधोपीतिध्येयं आमासीभूतोदाहरणमाह रदृंचेत्युदाहरणमिसर्धः सा
ध्यसाधनोभयाश्रयेत्यादि। साध्यसाधनोपपयमेवाश्रयोनिरूपकंयस्याइतिवृत्पत्त्यासाध्यसाधनोभयाश्रयपदंसाध्यसाधनोभयनिरूपितत्वाभिप्रायंतथाचधूमवानवन्हेरित्यादौसाध्यसाधनोभयव्याप्तिविक राम॰
१७

ल्त्वात् यो यो धूमवान् स वह्निमानित्युदाहरणमाभासरूपमित्यर्थः । अनुपदर्शितान्वये इति । अनुपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेत्युत्पत्त्याऽनुपदर्शितान्वयपदं तथाविधव्याप्तिकपरं तथा च यद्वाच्ये
नेयत्वादित्यादौ यो यो वाच्यत्वाभाववान् स तेयत्वाभाववानित्युदाहरणं अनुपदर्शितान्वयव्याप्तिकत्वादाभासरूपमित्यर्थः । विपरीतोपदर्शितान्वये इति विपरीतक्रमेणोपदर्शितोऽन्वयोऽन्वयव्याप्तिर्येनेत्युत्पत्त्या
विपरीतोपदर्शितान्वयपदं तथाविधव्याप्तिकपरं तथा च पर्वतो वह्निमान् धूमादित्यादौ यो यो वह्निमान् स धूमवानित्युदाहरणं विपरीतक्रमेणोपदर्शितव्याप्तिकत्वादाभासरूपमित्यर्थः । अनुपदर्शितव्य
तिरेके इति अनुपदर्शितो व्यतिरेको व्यतिरेकव्याप्तिर्येनेत्युत्पत्त्या अनुपदर्शितव्यतिरेकपदं अनुपदर्शितव्यतिरेकव्याप्तिकपरं तथा चायं न घटाभिन्नः एतत्घटत्वादित्यादौ यो य एतत्घटत्ववान् स एतत्
घटाभिन्नत्ववानित्युदाहरणं अनुपदर्शितव्यतिरेकव्याप्तिकत्वादाभासरूपमित्यर्थः । विपरीतोपदर्शितव्यतिरेके इति विपरीतक्रमेणोपदर्शितो व्यतिरेको व्यतिरेकव्याप्तिर्येनेत्युत्पत्त्या विपरीतोपदर्शितव्य
तिरेकपदं तथाविधव्यतिरेकव्याप्तिकपरं तथा च अयमेतत्घटाभिन्नः एतत्घटत्वादित्यादौ यो यः एतत्घटत्वाभाववान् स एतत्घटभिन्नत्ववानित्युदाहरणं विपरीतोपदर्शितव्यतिरेकव्याप्तिकत्वादाभास
रूपमित्यर्थः । एतदुदाहरणानामाभासत्वाय योजकमाह तत्साध्यसिद्ध्यौपयिकव्याप्तिप्रत्यानुपधायकत्वमवगन्तव्यम् । उदाहरणानन्तरमिति उदाहरणप्रयोगानन्तरमित्यर्थः । अन्वयव्याप्त्युपनयप्रयोगार्थ

18

म॰ यु॰ १८

कोपनयइत्यनेनव्याप्तमित्यादिपक्षः साध्यव्याप्यप्रकृतहेतुमान्नेवस्याकांक्षायामित्यर्थः तेनेत्रित्यत्वप्ररोनोपनयनिरूपरोक्तत्वेस्सर्थः। अनुमितीत्यादि अत्र जनकीभूतप्रकृतसाध्यानुमित्सौपयिकव्याप्ति
विशिष्टप्रकृतहेतुप्रकारकपक्षविशेष्यकशाब्दबोधजनकपदं न्यायवत्यविधशाब्दबोधजनकत्वेसतिन्यायावयवत्वमुपनयत्वमित्यर्थः यत्तेकपदस्यावृत्तिस्तत्स्यैषैव सामान्यलक्षणामुक्ताविशेषलक्षणा
हसाध्यव्याप्येत्यादिसाध्यनिरूपितव्याप्तिविशिष्टप्रकारकपक्षविशेष्यकशाब्दबोधजनकत्वेसतिन्यायावयवत्वंअन्वयुपनयत्वंव्यतिरेक्युपनयत्वमितितिविशेषलक्षणाद्वयमित्यर्थः उदाहरणांनावयवत्वादिमतंनि
राकरोतिउदाहरणांनरएवेत्यादितृतीयलिंगपरामर्शस्येतिप्रकृतसाध्यानुमित्सौपयिकत्वानस्येत्यर्थः। अवयवांतरादित्युपनयाभिन्नावयवादित्यर्थः। तथाचप्रकृतसाध्यानुमित्सौपयिकव्याप्तिविशिष्टपक्षध
र्मताज्ञानसंपत्त्यर्थमुपनयप्रयोगआवश्यकइतिभावः ननुमीमांसकमतेविशिष्टपरामर्शस्यानुमितिजनकत्वमयान्नइत्याभेपित्स्मितिविरहइमतआहतन्नभ्युपगमेपीतितथाविधविशिष्टपरामर्शस्यानुमि
त्यजनकत्वेपीत्यर्थः पक्षधर्मतापाः अभावात्व्याप्यतावच्छेदकरूपेणापक्षवृत्तिज्ञानस्यानुमित्सौपयिकस्यउपनयंविनाऽसंभवात्तत्र्यावयवेरेरपितथाविधज्ञानस्यानुमितिजनकत्वास्युपगमेनतन्नसंपत्त्यर्थं
मुपनयप्रयोगआवश्यकइतिभावः ननुहेत्ववयवादेवतल्लाभोभविष्यतीतिकिमुपनयेनेत्यतआहनवेत्यादिहेतुवचनात्हेत्ववयवान्नमरइतिगमः तथाविधपक्षधर्मतावगमः तस्येतिहेत्ववयवस्येत्यर्थः कोत्रहे राम॰ १८

तुरित्याकांक्षायांकुतइत्याकांक्षायांप्रवर्त्तकत्वेनप्रयुक्तत्वेनहेतुत्वस्वरूपेस्यादिलिंगनिरूपितहेतुत्वबोधकस्येत्यर्थः अनन्यपरत्वात्तदुपदर्शितपक्षधर्मत्वाबोधकत्वात्शंकनेवादिवाक्यादिवेत्यादिवाक्यान्
हेत्ववयवोनानुपपक्षेलिंगत्वात्तत्साध्यसाध्यवत्त्वप्रतीताविनियोगः आक्षेपइतियोयत्तत्साध्यसाध्यवान्समन्वयइतियत्तत्तदुक्तिसामान्यमुखव्याप्तित्वानानहेतोयपक्षवृत्तितानुमितिरित्यर्थः नयावानुमा
नादेवपक्षवृत्तितायात्वाभेकिंनहेतुधर्मोपनयेनेत्यर्थः । नदृश्यस्येतिहेत्ववयवोनार्थस्यप्रमज्ञानत्वानत्ताप्यवन्हिमनेइत्यर्थः असिद्धत्वेनगृहीतप्रामाण्यकलिंगवापिपक्षत्वेनअनाहार्यपक्षत्वात्धनतया
विधानुमितिजनकत्वात्तथाचहेत्ववयवोज्ञापितनिश्चयेप्रामाण्यनिश्चयाभावेनानुमितिप्रतिगृहीतप्रामाण्यकलिंगनिश्चयस्यहेतोरभावेनतथाविधानुमित्यसंभवादितिभावः । अस्येति । अगृहीतप्रामा
ण्यकलिंगनिश्चयस्यापिअनुमितिहेतुत्वेइत्यर्थः प्रतिज्ञामात्रादेवेतिप्रतिज्ञाजन्यबोधविषयसाध्यवत्त्वादेवेत्यर्थः सर्वत्रेतिसर्वत्रसाध्यज्ञापकहेतुमत्त्वादित्याभसंभवइत्यर्थः । अवयवांतरविलयात्
हेत्ववयवादेरपिवैयर्थ्यप्रसंगात्अनुमानादेवहेत्ववयवप्रतिपाद्यबोधसंभवादित्यर्थः । ननुवादिनंउपनयवाक्याभावेपिप्रतिज्ञाहेत्ववयवाभ्यांसाध्यवत्पक्षहेत्वोरुपस्थितौपक्षेहेतुमानित्या
कारकोपनीतभानस्यहेतोःपक्षवृत्तित्वावगाहिनःप्रतिवादिनिसंभवात्वादिन४उपनयप्रयोगोनिरर्थकइत्याशंकमेयप्रतियाद्यानामितिमतिवादिनामित्यर्थः । स्वतएववाद्युक्तेरितोपन

19

मथु०
१९

पक्षाकांक्षितैवं न स्वागमः हेतौ पक्षवृत्तित्वावगमः येन तद्रूपेणायत् पक्षज्ञानं तेन रूपेणावगतं तद्रूपनयं इति मते पक्षो ऽज्ञाते हेतुकस्य पुरस्य तथा बोधासंभवात् न हि धार्मिवाचिनः उपनयवाक्यस्य प्रयोग

आवश्यकत्वसाधनाय न समाधत्ते नैयायिकाः तेषां प्रतिवादिनां स्तुत्य साध्यसत्त्वान याय पक्षे हेतुमत्ताज्ञानं तद्भावे व्याप्त्या सर्वत्रैव संभवात् । यस्य प्रतिवादिनः प्रथमं पक्षे हेतुमत्ताज्ञानं नास्ति तस्य तत्पादि

धोपनीतमात्रासंभवात् तथा च तस्य हेतौ पक्षवृत्तित्वज्ञानासंभवात् उपनयप्रयोगो ऽवश्यक इति भावः । पक्षेऽनुपनीतमानं प्रति उपनायकत्वान्मात्रं हेतुः ननु तत्र इव धिकरणमेव भवितव्यं ज्ञाने गौरवा

त् इति मते पित्रपन यस्यावश्यकतामाह प्रतिपाद्येकेनेति । प्रतिपाद्ये केनवादिना स्वव्यापारस्य निर्वाहयितुं पक्षः साध्यव्याप्यवान् इत्याकारकं ज्ञानं निवर्तकस्वीयवाक्यस्य संपादयितुं तथा च तत्पक्षे विधाकां

क्षानिवर्तकस्यैव उपनयप्रयोग आवश्यक इति भावः । अयमपीति आकांक्षानिवर्तकवाक्यस्य वादिना अनभिधानं इत्यर्थः । अव पक्षे नैरपि हेत्ववयवाह्वापि । एवं स्यात् अनभिधानप्रसंगः स्यात् । तथा च तत्र

यथाकांक्षानिवृत्त्यर्थः प्रयोगः प्रकृतेऽपि न येत्ति भावः । निगमनमिति प्रयुज्यत इति शेषः । तद्वृत्ति । निगमनं चेत्यर्थः अनुमितौ सा हि अत्र कारणांश प्रकृत व्याप्यवपक्षधर्मकं साम्यविशिष्टपक्षधर्मता

धीप्रयुक्तत्वं च व्याप्तिविशिष्टपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानत्वावच्छिन्नकार्यतायावच्छेदकत्वे सति व्याप्तिविशिष्टपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानत्वावच्छिन्नप्रकारकसाध्य

राम०
१९

ज्ञानजनकवाक्यमित्यर्थः। निगमनवाक्यघटकीभूततस्मादित्यंशार्थव्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वप्रकारकसाध्यविषयकज्ञानजनकवाक्यत्वात् तत्स्वरूपासमन्वयः प्रति
ज्ञा हि वह्निव्याप्तिवारणाय प्रकारकांतं तत्रापि विशिष्टांतं धूमाद्वह्निमतः सधर्म्मा पर्वतो वह्निमान् धूमादित्याद्यो प्रतिज्ञायामतिव्याप्तिवारणाय वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशिष्टधूमाद्वह्नि
मतः सधर्म्मा पर्वतो वह्निमान् धूमादित्याद्यप्रतिज्ञायामतिव्याप्तिवारणाय पक्षे प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकं पर्वतो वह्निव्याप्तिविशिष्टपर्वतवृत्तित्वविशिष्टधूमाद्वह्निमान् धूमा
दित्याद्यप्रतिज्ञायामतिव्याप्तिवारणाय प्रकृतसाध्येति नैवं सत्यपि तत्रातिव्याप्तिर्दुर्वारैवेति वाच्यं तथाविधज्ञानज्ञाप्यत्वनिष्ठप्रकारतानिरूपितसाध्यतावच्छेदकावच्छिन्नविषयतायाः तत्स्वरो
निवेशात् इति निगमनेनेत्यर्थवमाशंकते न चेति पर्यवसितेति ज्ञानाभादित्यर्थः तेनेति निगमनेनेत्यर्थः। अपर्यवसानादिति अनुमितिसामग्रीसंपादकज्ञानाभिधानाभिधेययोरिति अनुमित्यौ
पयिकार्थबोधकशाब्दज्ञानप्रतिपाद्ययोरित्यर्थः। पर्यवसानेनेति पूर्णत्वेनेत्यर्थः। अवयवान्तरागामिति निगमनान्तानामित्यर्थः साध्यभेदेन निगमनानामनंतत्वात् बहुवचनप्रयोगः ननु निगम
नानांगीकारे पक्षः साध्याभाववान्नवेत्याकारकशंकानिवृत्तिः कथं भविष्यतीत्यत आह विपरीतशंकेत्यादि पक्षः साध्याभाववान्नवेत्याकारकविपरीतशंकानिवृत्तेरित्यर्थः॥ तत एव भावात् व्या

२०

म॰ घु॰ २० विशिष्टपक्षधर्मताविशिष्टलिंगप्रतिपादकादिवसंभवादित्यर्थः अप्रयोजितत्वाविघलिंगप्रतिपादकत्वानुतथाविधशंकानिवर्त्तकत्वानंगीकारे इत्यर्थः तदस्वीकरणात् तथाविधशंकानिवर्त्तकसंभवाज्ञ
नसाध्याभावादिबोधकपदाभावेनस्यात्साध्याभावादिमत्ताज्ञानासंभवादितिभावः ननु निगमनेनमयथाकथंचिद्बोधस्तथातथाविधशंकानिवर्त्तकोभविष्यतीत्यत आह नहीति ननु निगमनेवि
शेषदर्शनिवर्त्तकपक्षेसाध्याभावादिमत्ताज्ञानेऽनाहार्यसंवेद्यमानासाधेवनतन्निवर्तकंतथाविधशंकानिवर्त्तकंबोधजनकंतथाचसाध्याभावाद्यविषयकतज्ज्ञानबोधकमित्यर्थः निगमनेइतिशेषः वार
स्यतत्रप्रतिबंधकत्वेमानाभावइतिभावः शंकतेसिद्धिनिर्देशात् येति सिद्धत्वविशिष्टसाध्यबोधकतयेत्यर्थः निगमनेइतिशेषः वारयतीति तथाविधशंकाप्रतिबंधकंभवतीत्यर्थः तथाविधप्रतिबंधप
तिबंधकभावस्यअनुभवबलात् स्थापयइतिभावः सिद्धत्वमत्रप्रमाणसिद्धत्वंहेतुविभक्तिसाकांक्षित्वरूपसाध्यत्वाभाववत्त्वंवा तत्राद्येदोषमाह स्वरूपमात्रेत्यादि। वह्निपदेनवह्निस्वरूपमात्रबोधनादि
त्यर्थः तथाचात्रतथाविधसिद्धत्वबोधकपदाभावेनतथावक्तुमशक्यत्वादितिभावः द्वितीयेदूषणमाह साध्यत्वानुपपत्त्येति विविच्य त्यादिपदेहेतुविभक्तिसाकांक्षत्वरूपसाध्यत्वस्याभावेनतदनुप राम॰
स्थितावित्यर्थः तस्मादित्यादि आकांक्षातानाभावेनवक्ष्यमाणेनस्यादितिहेतुविभक्त्यर्थस्यान्वयप्रसंगादित्यर्थः शाब्दबोधसामान्येप्रतिआकांक्षाज्ञानस्यहेतुत्वादितिभावः इदमुपलक्षणंतन २०

याविधार्थबोधकपदाभावेनतादृशबोधासंभवोपिद्रष्टव्यः।वस्तुतस्तुतथाविधसंदेहंप्रतिनिगादृशासिद्धत्वज्ञानप्रतिबंधकत्वस्यानुभवबलादृष्टत्वेनयानकिंचिदेतदित्यवधेयं।निगमनस्यानैरर्थक्य
पूर्वपक्षोपरिसमाधत्तेनेत्यादिनादृष्टभावाबोधनेऽवयवांतरात्बाधसत्प्रतिपक्षत्वाभावाबोधनेसमीहितान्वयात्अवयवांतरात्साध्यासिद्ध्युपयुक्तान्वयबोधासंभवादित्यर्थः।नयावाबाधितत्वा
दिबोधसंपत्त्यर्थंनिगमनानुसरणमावश्यकमितिभावः।नन्वेवंसतिवाधाभावादिज्ञानस्येत्यर्थः।अयान्वयव्यतिरेकानुविधानस्येवमानमित्यतआह।असिद्धेश्चेतितथाविधान्वयव्यतिरेकानुविधान
स्यासिद्धेरित्यर्थः।यत्रज्ञानेसतीत्यादिनायावत्तादृशव्याप्तिज्ञानस्यैवानुमितिंप्रतिअबाधितत्वादिज्ञानस्यजनकत्वेमानत्वमितिभावः।ननुनिगमनात्हेत्वबाधितत्वादिबोधोनसाक्षात्तत्रत्वद्बोध
कपदाभावात्किंतुनिगमनबोधितव्याप्तिविशिष्टपक्षवृत्तित्वहेतुकानुमानात्तच्चनसंभवतिनिगमनात्तथाविधपक्षवृत्तित्वबोधासंभवात्नचनिगमनघटकीभूतनतस्मादित्युपस्थापितव्याप्ति
विशिष्टपक्षवृत्तित्वविशिष्टहेतुज्ञानात्तादृशबोधोजनदृघटकत्वेनतथाविधपक्षवृत्तित्वबोधोपिसंभवतीतिवाच्यंपूर्वान्वितहेतुविभक्त्यर्थस्यपुनरन्वयेआकांक्षाविरहेणतदसंभवात्तथाचनिगम
नात्कथमबाधितत्वबोधइत्याशयेनाहनवानन्वयइतिनचनिगमनात्अबाधितत्वादिबोधासंभवइत्यर्थः।समाधत्तेनस्मादित्यादिनास्मादितिहेतुविभक्तेर्नार्थस्यान्वयबोधोनरमेवेत्यर्थः।व्याप्ति

21

मथु०

२१

व्याप्तिविशिष्टपक्षवृत्तित्वविशिष्टहेतुत्वात्तावच्छेदकरूपहेतुनेति बोध्यः हेत्वनाकांक्षितत्वादिहेतुविभक्त्यर्थान्वयप्रयोजकीभूताकांक्षाभाववत्त्वरूपायाश्च हेतुत्वं न्यायविधाकांक्षाविरोधित्वान्न घटितत्वाद्भाना-
दित्यर्थः। ननु तन्मते तावतापि सर्वत्र तथाविधविभक्त्यर्थान्वयासंभवे न न्यायविधविरोधित्वान्न मितित्वव्याप्तिविषयतावच्छेदकत्वमिलान्वयः। न न्यायहेतुविभक्त्यर्थस्यान्वये आकांक्षाविरहेऽपि निगमनजन्यबोधस्यैव तन्मतम्
केन न्यायविधाकांक्षात्वान् संभवेन निगमनानन्तर्यावच्छिन्नतथाविधपक्षवृत्तित्वविशिष्टहेतुबोधनिर्वाहे तादृशरूपेण तथाविधपक्षवृत्तित्वरूपहेतुताश्रयाबाधितत्वादिबोधोत्पत्तौ बाधकाभावात् नानुपपत्तिरिति बोध्यमिति
भावः ननु तथाविधपक्षवृत्तित्वरूपहेतुनैव चेदबाधितत्वादिबोधस्तदा निगमनं व्यर्थमुपनयादेव तथाविधपक्षवृत्तित्वबोधस्य निर्वाहे निगमनेनापि एकवाक्यत्वप्रतिपादितहेतुतावच्छेदकस्य पुनः
प्रतिपादने किं प्रयोजनमिति साकांक्षाकलितबाधितत्वादिबोधप्रयोजनकत्वाभ्युपगमे तथानुपपत्तिरथानुकूलतर्केण न तथाविधपक्षवृत्तित्वेनाबाधितत्वादिव्याप्तिमिति चाय संभवेऽनेन निगमनोत्तरमेवाबाधितत्वादिबो-
धः संभवतीति न गुरूपनयोपन्यासोपयोगः तथाविधव्याप्तिग्राहकानुकूलतर्कविरहादिति न्यायविधबोधस्य संपादकतया निगमनप्रयोगस्यावश्यकत्वमिति। केचित्तु तथाविधप्रयोजनकत्वाभ्युपगमे तथानुपपत्तिनिगमनघटकीभूतत-
त्पदस्यैवाबाधितत्वादिलक्षणायां तथाविधबोधः संभवतीति वदन्ति प्राचीनमतसिद्धं तस्मान्न्यायमिति निगमनप्रयोगे हेतुपितुं तन्मते दर्शयति इह केचिदिति पूर्वोक्ताबोधेनेव्याप्तिविशिष्टपक्षवृत्तित्वे रम०

२१

सर्थः। सिद्धस्यलक्ष्येति मैत्रः पचति अयमपि तथा इति लोकप्रसिद्धस्य लक्ष्येसर्थः। विरोधवारणायेति पक्षतावच्छेदकावच्छिन्नपक्षे साध्यस्याबोधप्रयुक्तो यउपक्रान्तप्रतिज्ञावाक्येन सह उपसंहृतन
निगमनवाक्यस्यामूर्तार्थबोधजनकत्वस्य विरोधस्तद्वारणाय इत्यर्थः। युक्त इति अत्र परामर्शस्यानुषंगेनान्वयः नपाद्येन स्माद्वह्निमानिति यदि निगमनप्रयोगस्तदा निगमनवाक्यात् पक्षतावच्छेदकाव
च्छिन्ने वह्नेर्लाभात् उपक्रमोपसंहारयोर्विरोधः स्यात् तस्मात्पाषाणमिति निगमनप्रयोगे तु न तथाविरोध इति तथैव निगमनप्रयोग उचित इति भावः। न चैवं सति निगमनघटकीभूततथाशब्दस्याव्यवहित
पूर्वस्मिन्बुद्धिविशेष्यस्वरूपं वाच्यः। अव्यवहितपूर्वबुद्धिविशेष्यसाधारणं वाच्य इत्यर्थः। तथा चायमित्यादि तथा वायमिसुपनयजन्यबुद्धौ हेतुमत्तया विशेष्यत्वादित्यर्थः। नचेति त्यादि नचेति शब्दादपि हे
तुमत्त्वस्यैव उपस्थितिः स्यादित्यर्थः। अनन्वय इति तथापदोपस्थापिते हेतुमति तस्यापदोपस्थापितत्वा विधहेतुमत्तुपहेमानत्तानेताप्यास्वत्वस्यान्वयासंभवदित्यर्थः। अभेदेन ताप्यतापकभावा
न्वयस्याबुध्नत्वादिति भावः। ननु अनुभवानुरोधात् तथायुक्तपरुषपेन तथाविधबोधे बाधकाभावस्तत आह नहीति हेतुमत्तादेवेत्यादि हेतुमत्तान्तावो हेतुमानितिपन्वयबोधोऽनुभवसिद्ध इत्यर्थः। तथा
च तथाविधबोधे अनुभावाभावेन तथायुक्तकल्पनमावश्यकमिति भावः। सामान्येनेति साधनाधिकरणत्वादि इत्यर्थः। पक्षस्यापीति। उपनयजन्यबोधविशेष्यस्यापीत्यर्थः। अन्वयव्याप्तौ प्रवेशादि इति अ

22

मयु॰ २२

त्वयव्याप्तिघटकत्वेनप्रकारत्वेन तत्र मानाहित्यर्थः तत्प्रकारान्वयइतिनिगमनजन्यबोधप्रकारीभूतस्य तस्मादित्यर्थहेतुमत्त्वान्तत्त्वाप्यत्वस्यान्वयइत्यर्थः नैतेत्रैवेतिउपनयजन्यबोधविशेष्यीभूतहेतुमत्तिप
क्षएवेत्यर्थः वाच्यस्तत्रतु न संभवतिमितिशेषः अनन्वयादितिउपदर्शितमुक्तमात्याविधान्वयबोधासंभवादित्यर्थः। अत एवैतेवक्ष्यमाणाद्दोषादेवेत्यर्थः। अभेदानुमानेवेत्यादिप्रकारः केवलान्वयिनी
त्यनेनरयोऽयः नस्माज्जर्थत्यादितस्मान्नयेति निगमनघटकीभूततत्पदार्थसाहचर्यस्यान्वयासंभवादित्यर्थः तथाचपर्वतः पर्वतभिन्नः पर्वतत्वादित्यादौ पर्वतसाहचर्यपर्वतत्वव्यापकस्याभावेन तत्त्वाप्यत्वा
भावात्पर्वतत्वव्यत्वाप्यत्वस्यएवं प्रमेयं वह्निमत् धूमादित्यादौ भेदघटितपक्षसाहचर्यस्याप्रसिद्धानतत्त्वाप्यतानीयतस्मान्नयेति निगमनवाक्यादन्वयबोधासंभवादितिभावः। ननुतत्पायद्बुद्धिस्थत्वेन बुद्धिस्थ
त्वेनबुद्धिस्थं बोधयिष्यतीतिजितत्रैवतस्मादित्यस्यान्वयो भविष्यतीत्यत आह वहूनां चेतिप्रक्रमेबुद्धिस्थत्वेविशिष्यानन्वयात्साध्यएवतस्मादित्यर्थस्यान्वयबोधासंभवात्अत्रापितत्पादिधान्वयबोधसंभ
वेनउपक्रमोपसंहारविरोधोदुष्परिहरइतिभावः नन्वत्रहेतुत्वान्तत्त्वाप्यत्वबाधात्पान्वयबोधो न भविष्यतीत्यत आह वादिवाक्येत्वेति। निगमनघटकतत्पदार्थबुद्धिस्थत्वेत्यर्थः योऽयत येत्यादिवाधीमा
ववल्लात्तस्मादित्यस्यान्वयो निकारेइत्यर्थः। अतिप्रसंगादितिधूमसंयोगादेरपिबुद्धिस्थतयातत्रापिवाधाभावेनपर्वतोवह्निमान्धूमादित्यत्रापि निगमनस्यतस्मात्पदार्थस्यान्वयबोधप्रसंगादि रम॰ २२

स्पर्थः तथा चोपक्रमोपसंहारविरोधो दुष्परिहर इति भावः ननु तच्छब्दस्य बुद्धिस्थवाचकतया बुद्धिस्थहेतुत्वेति लिंगज्ञानतज्ज्ञाप्यत्वस्यापि तस्मादित्यनेन बोधसंभवात् भवन्मतेपि कथं तस्मादित्यनेन हेतुज्ञान
ज्ञाप्यत्वस्यैवान्वय इत्यत आह तस्मादित्यत्रेत्यादि तस्मादिति पदघटकीभूतविभक्त्यर्थज्ञानज्ञाप्यत्वैकदेशे ज्ञाने हेतुत्वेति लिंगजन्यत्वबाधादन्वयासंभवादेव तस्मादित्यस्य हेतुज्ञानज्ञाप्यत्वबोधकत्वमिति यमइस्य
र्थः प्राचीननये साध्यतावच्छेदकावच्छिन्नसाध्ये हेतुज्ञानज्ञाप्यत्वस्य तथाविधनिगमनवाक्यात् बोधासंभवेन निगमनानन्तरं तथाविधहेतुनो हेतुविभक्त्यर्थान्वयनिराकांक्षत्वाद्बोधोप्यनुपपन्न इत्यभि
प्रायेण तत्समनन्तरं तदुपपादकमाह तस्मादिति तस्मादित्यादिविशिष्यासिद्धतासाध्यतावच्छेदकावच्छिन्ननिष्ठहेतुविभक्त्यर्थान्वयनिराकांक्षतासाध्यतया उक्तस्य हेतुज्ञानज्ञाप्यत्वेन बोधीनस्य साध्यस्य
समर्थहेतुसंबंधेन आभिविशिष्य पक्षत्वमित्थं विशिष्य हेतुज्ञानज्ञाप्यत्वेन पुनरुत्कीर्तनात् पुनर्बोधनानन्तरं च तत्र हि हेतुविभक्त्यर्थान्वयनिराकांक्षः हेतुविभक्त्यर्थबोधो न तद्बोधप्रकारीभूतहेतुविभक्त्यर्थ
वत्त्वादित्यनुमानान्निगमनानन्तरं निराकांक्षत्वबोधो मन्मते संभवति परन्मते तु साध्यतावच्छेदकावच्छिन्नपक्षेण तथाविधहेतुज्ञानाभावान्निगमनानन्तरं तथाविधानुमित्यात्मकनिराकांक्षत्वबोधोपि दुर्लभ इति
भावः ननु प्रकारान्तरेणोक्तनिराकांक्षत्वबोधो भविष्यतीत्यत आह अन्यथेति निगमनानन्तरं अनुमानात्तथाविधबोधानंगीकारे इत्यर्थः नद्रूप्यापत्तिरिति निगमनस्वीकारो निरर्थक इति भावः ननु साध्य

23

श्रो
१००

मथु०
२३

संशयप्रयोजनहेत्वाकांक्षादीनामपिअवयवत्वेनपांचेविधविधत्वोनिरनुचितमआह संख्यायेत्यादि प्रयोजनंतत्त्वनिर्णयेच्छा: अवयवत्वस्वरूपाभावाद्यावयवत्वघटितावयवत्वस्वरूपाभावान्न
वयवाः नन्यायावयवाः न्यायांगत्वेनेति न्यायसंपादकत्वेनेत्यर्थः उपयुज्यंतेअयेहंतेनाधिक्यमितिनावयवाधिक्यप्रसंगइत्यर्थः केटकोद्धारस्येति कोवन्हिमान्कुतोवन्हिमानकथमस्यगमकत्व
मितिप्रश्नसमूहस्येत्यर्थः नसार्वत्रिकत्वमिति नसर्वत्रन्यायसंपादकत्वमित्यर्थः समयविशेषोपयोगित्वादिति कदाचित्कत्वादित्यर्थः यत्रप्रकारांतरेणाग्निवादिनस्तत्पाविधाकांक्षाबुध्या
वादिनामायः प्रयुक्तस्तत्रनपाविधप्रश्नस्याभावादिति भावः ।। अवयवग्रंथरहस्यंसमाप्तं ।। ।। ।। किंचिदत्रविरुद्धंचेदुरुक्तंदेवशान्मया ।। भ्रांते: पुरुषधर्मत्वात्क्षंतव्यंमनीषिभिः ।। १ ।।

राम०
२३